# आरण्यकम्

## संस्कृतप्रसारपरिषदः अर्धवार्षिकं शोधपत्रम्

वर्षम् - ~~सप्तमम्~~ अष्टमम्　　　　अङ्कः - ~~द्वितीयः~~ प्रथ…

चैत्रः
~~आश्विनः~~, वि० सं० २०५८　　८/

~~सितम्बर, २०००~~
मार्च, 2001

प्रतिवर्षं प्रकाशनकालः
चैत्रः, आश्विनः–विक्रमाब्दः
मार्च, सितम्बर

प्रत्यङ्कम्–१५ रूप्यकाणि　　　　वार्षिकं शुल्कं ३० रूप्यकाणि

**परामर्शदात्री समितिः**

पण्डित वासुदेव द्विवेदी, वाराणसी

डा० सुरेशचन्द्र गो० काण्टावाला, बड़ोदरा

डा० हरिहर झा, दरभङ्गा

डा० उमाशङ्कर शर्मा 'ऋषिः', पटना

डा० भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी

डा० राय अश्विनी कुमारः, बोधगया

प्रधानसम्पादकः

पण्डित व्रजभूषण मिश्र 'आक्रान्तः'

सम्पादकः

डा० गोपबन्धु मिश्रः

प्रकाशिका

संस्कृतप्रसारपरिषद्

मारुतिमन्दिरम्

प्रकाशपुरी, आरा (विहारः)

802301

संस्कृतप्रसारपरिषद्, आरा पक्षतः डा० गोपबन्धु मिश्रेण, आरा प्रिन्टर्स, गोला मुहल्ला, आरा, बिहार-802301 इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च ।

डा० गोपबन्धु मिश्रः

सम्पादकः

# सूचीपत्रम्

| | विषयः | लेखकः | पृष्ठम् |
|---|---|---|---|
| | सम्पादकीयम् | | |
| १. | अनुसन्धानम् | डा० व्रजकिशोर स्वाईं<br>उपाचार्यः, धर्मशास्त्रविभागः<br>श्री जगन्नाथ संस्कृत विश्वविद्यालयः<br>पुरी (ओड़िशा) | १ |
| २. | आङ्ग्लेय्याः संस्कृते अनुसरण-प्रक्रिया-निर्माणम् | के० कादम्बिनी<br>शोधच्छात्रा<br>राष्ट्रिय संस्कृत विद्यापीठम्<br>तिरुपतिः (आ० प्र०) | ५ |
| ३. | संस्कृतप्रसारपरिषद्, आरा संक्षिप्तम् इतिवृत्तम् | | १४ |
| ४. | वैयाकरणनिकाये स्वतःप्रामाण्य-मागमप्रमाणस्य | डॉ० मङ्गलारामः<br>असिस्टण्ट प्रोफेसर, संस्कृतविभागः<br>जयनारायण व्यास विश्वविद्यालयः<br>जोधपुर (राजस्थान) | १५ |
| ५. | वाल्मीकीयरामायणे जलतत्त्वम् | घनश्याम पाठकः<br>शोधच्छात्रः<br>वीर कुँवर सिंह विश्वविद्यालयः<br>आरा (विहारः) | २१ |
| ६. | पर्याप्तम् अपर्याप्तं वा ? (एकं चिन्तनम्) | डा० गोपबन्धु मिश्रः | २४ |
| ७. | वेदे कालस्याध्ययनम् | डा० वी० रामकृष्ण भट्टः<br>उपाचार्यः, वेदान्तविभागः<br>श्री शङ्कराचार्य संस्कृत विश्वविद्यालयः, कलाड़ी (केरल) | २५ |

| | | |
|---|---|---|
| ८. अवधूतस्य कपोतो गुरुः (एकं चिन्तनम्) | श्री सुनील कुमार प्रधानः शोधच्छात्रः, संस्कृतविभागः वीर कुँवर सिंह विश्वविद्यालयः, आरा (विहारः) | ३० |
| ९. भवभूतेः रामः-एको विमर्शः | रेखा रानी शोधच्छात्रा, संस्कृतविभागः मगध विश्वविद्यालयः, बोधगया (विहारः) | ३१ |
| १०. शब्दशक्तयः | कामिनी एम० फिल० छात्रा दिल्ली विश्वविद्यालयः, दिल्ली | ३५ |
| ११. 'स्वप्नवासवदत्ते' मिथ्याचारस्य कौशलम् | प्रकाश चन्द्र यादवः शोधच्छात्रः, संस्कृतविभागः टी० एन० बी० भागलपुर विश्वविद्यालयः, भागलपुरम् (विहारः) | ३९ |
| १२. उर्वी (पुस्तकसमीक्षा) | रचयिता-डा० रवीन्द्र कुमार पण्डा समीक्षकः- श्री सुनील कुमार प्रधानः | ४४ |
| १३. 'काव्येषु नाटकं रम्यम्'- एकं पुनरीक्षणम् | डा० विजय कुमार झा संस्कृतशिक्षकः, ज्ञाननिकेतनम् विट्ठलविहारः, पटना (विहारः) | ४५ |
| १४. लक्ष्मीश्वरोपायनम् (पुस्तकसमीक्षा) | रचयिता-श्री रघुवीर मिश्र 'द्विरेफः' समीक्षकः - श्री सुनील कुमार प्रधानः | ४९ |


❖

# सम्पादकीयम्.....

**'अग्रतः सकलं शास्त्रं पृष्ठतः सशरं धनुः'** इति विहारविद्यालयपरीक्षासमितेः प्रतीकात्मकं घोषवाक्यमस्ति । ज्ञानप्राप्तये विवेकसमृद्धये च शास्त्रमावश्यकम्, तच्च जीवने प्राथमिकं भवेत् । पुनः आत्मनः रक्षायै राष्ट्रस्य संरक्षायै च शस्त्राणि शस्त्रसंचालनविद्या अपि अपेक्ष्येते एव । एतत् शस्त्रं सहैव स्यात्, परन्तु एतत् प्राथमिकतया न प्रयोक्तव्यम् इति एतस्य वाक्यस्य तात्पर्यमस्ति । परन्तु आधुनिककाले शास्त्राणाम् अपेक्षया शस्त्राणाम् अधिकः प्राथमिकतरश्च प्रयोगः क्रियमाणः दृश्यते । आदौ एतस्य उपयोगः मनुष्येतराणां प्राणिनां हननप्रसङ्गे व्यसनप्रणयिनां मनुष्याणां द्वारा प्रारब्धः । क्रमशः शस्त्रव्यवहारः आत्मरक्षैकध्येयः न भूत्वा व्यसनपूरकः अभवत्, ततश्च इदानीं बध्याबध्यबोधशून्यः हिंसैकप्राणश्च जायमानो लक्ष्यते । पृष्ठस्य शस्त्रसम्बद्धः विषयोऽयम् अग्रे आगतः । अतः अग्रगण्यः अखिलशास्त्रप्रसङ्गः केवलं शस्त्रप्रयोगकुशलतैकपोषकः इव अनुभूयमानः अस्ति।

अनर्थकमिदं परिवर्त्तनम् । विश्वधर्मः मानवधर्मो वा खण्डनीयः नास्ति । शास्त्रेण 'सह नाववतु, सह नौ भुनक्तु' इति सम्पूर्णे विश्वे सहावस्थानस्य बोधः वर्धते, 'सर्वे भवन्तु सुखिनः', 'आत्मवत् सर्वभूतेषु' इति विश्वकल्याणकारिणी भावना पोष्यते । यत् शास्त्रम् अधिकान्नोत्पादकं, जलस्रोतोज्ञानसंसाधकं, शिक्षासंस्कृतिविकासकरं, कठिनरोगनिवारकं वाऽस्ति, तत् अग्रेसरं भवति चेत् अखिलं जगत् सत्यं शिवं सुन्दरं च भूयात् । परन्तु येन शास्त्रेण अणुविस्फोटकं क्षेपणास्त्रम् एतत्तुल्यमसङ्ख्यं नवनव-विनाशव्याप्तिं संसाधयत् शस्त्रम् अस्त्रं च निर्मीयते, येन च शास्त्रेण एतस्य कुशलः प्रयोगः ख्यायते, तादृशं शास्त्रं यत्र अग्रे सरत् दृश्यते, तत्र मानवता विलपति, सौमनस्यं हिमपातेन कुमुदमिव शीर्यते, स्वार्थान्धता राजते, प्रेम पराभूयते, अनुरागः विषयरागम् अनुधावति, सूर्यरश्मिः कृष्णकायेन

मेघेन इव सत्त्वं तमसा आच्छिद्यते, पतितम् उत्थितायतं, प्रमादः प्रमुद्यते, इत्येवमेव सर्वम् अनिष्टकरं भवति ।

एकेन चिन्तकेन उक्तम् - अस्माकं 'गीता' इदानीं विपरीतवृत्तिः जायमानाऽस्ति । मूलगीतायां भगवान् श्रीकृष्णः सारथिः आसीत्, न तु रथी । अर्जुन एव रथी आसीत् । अर्थात् 'आत्मानं रथिनं विद्धि, बुद्धिं तु सारथिं विद्धि' (कठोपनिषद्) इति रीत्या बुद्ध्या सारथिना भवितव्यम्. तेन रथी आत्मा सन्मार्गेण स्वलक्ष्यं प्राप्तुं क्षमः भवेत् । परन्तु इदानीम् अस्माकं जीवनगीतायाम् अर्जुनः सारथिः श्रीकृष्णश्च रथी इति वैपरीत्यं सार्वत्रिकमस्ति । आत्मानं 'भोक्ता' इति मन्यमानः अर्जुनतुल्यः द्वन्द्वी अहङ्कारी पुरुषः रथं चालयन् अस्ति, तत्र श्रीकृष्णतुल्या बुद्धिः रथिरूपेण विद्यमाना याथातथ्येन दिग्भ्रमेषु पतिता लक्ष्यविहीना एव दृश्यते । अत एव सम्पूर्णमानवजातिः दानवा इव कुपथगामिनी एवास्तीति प्रतीयते । एतदर्थं शास्त्राणां प्राथम्यं शस्त्राणां गौणता च साधयितव्या एव । अन्यथा सर्वशक्तिमान् विभुः व्यापकः परमेश्वरः भगवान् श्रीकृष्णः महाभारतरणाङ्गने स्वयं रथी न भूत्वा सारथित्वं कथं निर्वहेत् ? तत्रेदं तात्पर्यं यत् यत्र सारथिः स्थिरमतिः प्राज्ञः तत्र रथिनः जयः निश्चयः । अन्यथा (एतस्य वैपरीत्ये वा) विपर्ययः सुनिश्चित एव । तद्वत् बुद्धिवैभवविकासकारिभिः शास्त्रैः अस्माकं सारथितुल्यैः मार्गदर्शकैः सुतरां भवितव्यं तथा च रथितुल्यैः अस्माभिः सर्वतो रक्षायै रक्षकैः शस्त्रैः सह स्थातव्यमिति भावः ।

'आरण्यकम्' इदं शास्त्रशस्त्रयोः यथाविभागम् एवम् उपयोगं विज्ञापयितुं साधनानि योजयत् प्रवर्तते । प्राचीने वा आधुनिके वा वाङ्मये तानि भूयः ऊह्यानि सन्ति । एतदर्थं सर्वैः चिन्तकैः सम्यक् प्रयतितव्यमिति शम् ।

*विद्वदवनतः*

सितम्बर २००० **गोपबन्धु मिश्रः**

सम्पादकः

# अनुसन्धानम्

**डा० व्रजकिशोर स्वाईं**

०. अनुसन्धानशब्दस्य अर्थः विद्यमानस्य वस्तुनः प्रतिपादनम्। एतत् प्रतिपादनं यदा एकां निश्चितां पद्धतिमवलम्ब्य क्रियते तदा अनुसन्धानस्य फलप्राप्तिः युक्तियुक्ता भवति । केवलं स्वेच्छया नकारात्मकभाषाप्रयोगेण अनुसन्धानस्य फलं निवारयितुं न शक्यते । एतस्मिन् समये तदनुसन्धानं किमिति महतां मनस्सु प्रश्नो जागर्ति । एतस्य प्रश्नस्य उत्तरमनेन विमर्शेन ज्ञातुं शक्यते ।

1. अनुसन्धानशब्दस्य अनेके पर्यायवाचिनः शब्दाः सन्ति । यथा-शोधः, अन्वेषणम्(णा), गवेषणा, संशोधनम् । आंग्लोभाषया एतस्य संज्ञा रिसर्च इति कथयितुं शक्यते । अनुसन्धानेन केवलं नूतनस्य पदार्थस्य सर्जनात्मकः परिप्रकाशो न भवति, अपि तु अज्ञातस्य ज्ञानमपि भवति । यतः मनुष्यस्य संकल्पविकल्पात्मकं मनो वर्तते, निश्चयात्मिका बुद्धिश्च वर्त्तते, अतः मनुष्यः तथ्यं युक्तिपूर्णविवेचनया ज्ञातुमिच्छति । एतदर्थं स सर्वथा जिज्ञासुप्राणित्वेन परिचीयते । मनुष्यस्य जिज्ञासा प्रारभ्यते युष्मच्छब्दार्थस्य अनुशीलनेन । एतस्या जिज्ञासाया द्वितीयो विषयो विद्यते अस्मच्छब्दार्थः । एतयोरनुसन्धानेन तथ्यं ज्ञात्वा मनुष्यः तच्छब्दार्थस्य तत्त्वं यदा ज्ञातुमभिलषति तदा गवेषणा प्रारभ्यते । एतदर्थं तस्य यत् युक्तियुक्तं मार्गणं तदेव अनुसन्धानमिति नाम ।

2. जगति किमस्ति, जगच्च किमिति, मां जगच्च कः कस्मादानीय अवस्थापयति, जगता सह मम को वा सम्बन्धः इत्येते प्रश्नाः क्रमेण मनुष्यस्य मनसि वारंवारमुत्पद्येरन् । एतेषां प्रश्नानामुत्तराणि यतो यतो वा रुचिकराणि ततः ततः मनुष्योऽसन्तुष्टो भवति । तमसन्तोषं दूरीकर्तुं सोऽधिकं पुनर्ज्ञातुमिच्छति । कदाचित् मनुष्यां भौतिकोपादानै-

रात्मनोऽसन्तोषं दूरीकर्तुं पारयति । कदाचित् एतानि भौतिकोपादानानि एतदर्थमसहायकानि भवन्ति । आध्यात्मिकरहस्यं ज्ञातुं यदा मनुष्य इच्छति तदा भौतिकोपादानानि नैव उपादीयन्ते । अनेन कारणेन स आत्मानमनङ्गीकर्त्तुं नार्हति । आत्मनः सत्तामात्रमनुभवति । एतस्मिन् समये स जानाति यत् भौतिकपदार्थानाम् आत्मनः प्राप्तये उपादेयत्वं नास्ति । एवं प्रकारेण अज्ञातस्य ज्ञानार्थमुपादानस्य भेदं मनुष्यो निश्चिनोति ।

3. इतस्ततोऽज्ञातस्य विद्यमानस्य पदार्थस्य ज्ञानाय नानाक्षेत्रेषु चमत्काराः प्राप्यन्ते, ये अनुसन्धानार्थं तथ्यरूपेण आकलयितुं शक्येरन् । ऋग्वेदे श्रूयते यत् सत्यस्य मुखं हिरण्मयपात्रेण अपिहितं तिष्ठति, इति कृत्वा सत्यमसत्यवत् प्रतिभासते । यावत्पर्यन्तं तत् पिधानं नैव दूरीकरिष्यते तावत्पर्यन्तं सत्यस्य ज्ञानं नैव भवति ( **हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्** ) । इदानीं योऽनुसन्धाता स तत्त्वदर्शी । तत्त्वदर्शनेन सत्यस्य ज्ञानं भवति । अतः अनुसन्धातुः तत्त्वज्ञानमावश्यकम् । अनुसन्धानसमये तत्त्वज्ञानेन अपिधानजनिता भ्रान्तिः दूरीक्रियते । अनुसन्धानसमये तत्त्वमतयोः ज्ञानमावश्यकम् । तत्त्वं सर्वथा एकम् । मतानि बहूनि भवन्ति । मतेषु पार्थक्यं तिष्ठति । तत्पार्थक्यं तत्त्वज्ञानेन अपसरति । अतः अनुसन्धानेन तत्त्वज्ञानं जायते । तदर्थमुच्यते **'निर्णयस्तत्त्वदर्शनम्'** इति । अनिर्णीतानां मतानां तत्त्वदर्शनेन निर्णयो भवति ।

4. कदाचित् मनुष्यस्य मनसि अयमेको भावः स्वत उदेति यत् सकलं पुरातनं वस्तु सम्यक्, नवीनं च वस्तु दोषदुष्टम् । अनुसन्धातृदृष्ट्या अयं भावो न समीचीनः । अनुसन्धाता उभौ परीक्ष्य अन्यतरत् स्वीकरोति । एतदर्थमेकः कालिदासीयः श्लोकोऽस्माभिः श्रूयते । स यथा-

**पुराणमित्येव न साधु सर्वं**
**न चापि काव्यं नवमित्यवद्यम् ।**
**सन्तः परीक्ष्यान्यतरद् भजन्ते**
**मूढः परप्रत्ययनेयबुद्धिः** ।। (मालविकाग्निमित्रम्)



किन्तु सर्वस्मिन् समये पुरातनं न त्याज्यम् । मनुष्यस्य यदा नूतना दृष्टिरुदेति तदानीं स केवलं पुरातनं नानुसरति, अनुकरोति वा, न च तस्य मौलिकताया विरोधे गच्छति । स नूतनक्षेत्रेषु नूतनेन सह पुरातनं मिश्रयति, येन आत्मनः ज्ञानस्य परिसरो वर्धते । अनेकानि आप्तवचनानि सन्ति । तानि साधारणतया विश्वासार्हाणि भवन्ति । किन्तु अनुसन्धाता निष्क्रियभावनया तानि नैव स्वीकरोति ।

5. यदा मनुष्यः स्वयमनुभवति यत् स एकस्मिन् विषये यत् जानाति तत् न सत्यमथवा न समीचीनम्, अथवा एकस्मिन् विषये यदि स न जानाति, तदानीं स ज्ञातुमिच्छेत् । तत्रैव तस्य अनुसन्धानं प्रारभ्यते। किन्तु अधिकाधिकतथ्यानि आहृत्य अधिकाधिकविषयान् परीक्ष्य च तेषां तत्त्वज्ञानमर्जयति । एतेन तस्य अनुसन्धानस्य क्रिया इत्थमग्रेसरति यथा स नानुभवति यत् कदा तस्य अनुसन्धानं समाप्तिमेष्यति । वस्तुतः ज्ञानस्य असीमत्वात् ज्ञानलब्ध्या ज्ञानस्य समाप्त्यभावात् अनुसन्धानस्य समाप्तिः कदा भवेत् इति वक्तुं न शक्यते । एतेन इदमेव स्थिरीक्रियते यत् अनुसन्धानमेका स्वतः प्रवाहधारा यस्या आदिरस्ति, अन्तं नास्ति । यावत्पर्यन्तं ज्ञानम् आहृतं भवति तावत्पर्यन्तमनुसन्धानं निरन्तरतया चलति।

6. अनुसन्धानेन लब्धं ज्ञानं सर्वस्मिन् समये सत्यरूपेण न तिष्ठति । पुनः पुनः अन्वेषणेन प्राप्तस्य ज्ञानस्य पुनः पुनः परीक्षणं क्रियते, पुनः सत्यं देशकालानुरोधेन परिवर्त्तते । कदाचित् मनुष्यः ज्ञातं तथ्यं समर्थयति, कदाचित् तस्य नवीनां व्याख्यां करोति । एतेन प्राचीनस्य ज्ञानस्य सद्यस्कालता आगच्छति । अतः तथ्यस्य सद्यस्कालतासंपादनं येन कर्मणा भवति तत् अनुसन्धानं नाम । मनुष्यस्य मनसः किञ्चित् सततं कर्म विद्यते तत् भवति मननम् । मनः स्वव्यापारात् कदापि न निवर्त्तते। अतः मननव्यापारो यावत्पर्यन्तमस्ति तावत्पर्यन्तमनुसन्धानस्य परिसरो वर्द्धते ।

7. प्राचीने काले अनुसन्धानं भवति स्म । प्रत्येकं युगे अनुसन्धानं पृथक् भवति । प्रत्येकयुगे नूतनं तथ्यं, नूतनो विचार आविष्कृतो भवति इति न, किन्तु पुरातनानां विचाराणां नवीनरूपप्रदानार्थं कार्यं चलति ।

ज्ञातस्य तथ्यस्य युगानुरूपिणी व्याख्याऽपि अनुसन्धानस्य अङ्गं भवति । यदा तर्को भिन्नो भवति तदा अनुसन्धानं नवीनं भवति ।

8. पाश्चात्यराष्ट्रेषु आरिष्टोटलमहाभागेन अनुसन्धानार्थं निगमनतर्कप्रणाल्या निर्णायकतथ्यानां प्रस्तुतेः उपक्रमः कृतः । अस्यां पद्धतौ पूर्वस्वीकृतः सिद्धान्तः मुख्याधारत्वेन स्वीकृतः, तेन अनुमानस्य प्रारम्भो जातः । इयं प्रणाली क्रमेण अनुसन्धानक्षेत्रे वैज्ञानिकप्रक्रियामुद्भावितवती । अत्र केवलं त्र्यवयववाक्यव्यवहारः आसीत् । किन्तु भारतीय-नैयायिकैः पञ्चावयववाक्यद्वारा अनुसन्धानप्रयोगः समारब्धः । अत्र - प्रतिज्ञा, हेतुः, उपमानम्, उपनयः, निगमनं चेति पञ्च वाक्यानि व्यवह्रियन्ते। पाश्चात्यराष्ट्रे तर्कस्य आगमनप्रणाली कालक्रमेण स्वीकृता। अत्र वेकनमहाभागस्य विद्वत्ता सर्वजनविदिता वर्तते । किन्तु लाराबीआईन्स्टाइनप्रभृतयः तर्कस्य आगमनप्रणालीमस्वीकृत्य उद्देश्यनिमित्तकनिरीक्षणपरीक्षणप्रणालीमङ्गीकृतवन्तः । परवर्तिनि समये दारविनमहाभागः एतयोः द्वयोः प्रणाल्योः समन्वयं चकार । समन्वयपद्धत्यनुसारमनुसन्धानकर्मणि अनुसन्धाता कामपि प्राक्कल्पनां स्वीकृत्य अग्रे सरति । तत्र यत् यत् तथ्यमेकत्र भवति, तेन सिद्धम् असिद्धं वा तथ्यं निश्चितं क्रियते । यदि असिद्धं भवति, तत् परित्यज्य पुनः प्राक्कल्पनायाः परिवर्तनं कृत्वा नवीनां परिकल्पनामादत्ते अनुसन्धाता। स तदनुसारं तथ्यं संकलयति । तदाधारेण कमपि विशेषनिष्कर्षमुद्भावयति।

9. सर्वथा निगमनप्रणालीमागमनप्रणालीं च स्वीकृत्य यदि अनुसन्धानं क्रियते तर्हि इयं प्रणाली वैज्ञानिकप्रणाली भवति । अत्र युक्तेः प्राधान्यं सर्वाधिकम् ।

10. अन्ततो गत्वा एतत् वक्तुं शक्यते यत् (क) मनुष्यस्य कल्पना अस्ति, किन्तु तस्याः निर्दिष्टं लक्ष्यं नास्ति । (ख) यस्याः कल्पनायाः निर्दिष्टं लक्ष्यं स्यात् तच्चिन्तनं स्यात् । (ग) चिन्तनस्य निर्णयः येन क्रियते तत् अनुसन्धानं नाम, यतः लक्ष्यमनु अनुसन्धाता धावति ।

❖



# आङ्ग्लेय्याः संस्कृते अनुसरण-प्रक्रिया-निर्माणम्

के० कादम्बिनी

## 1. प्रस्तावना

कम्प्यूटरयन्त्रद्वारा एकस्याः भाषायाः अन्यस्यां भाषायाम् अनुवादाय बहवः प्रयासाः बहोः कालतः क्रियमाणाः सन्ति। परन्तु नैतावता तत्र साफल्यं लब्धं यतः भाषायां प्रतिपदं सन्दिग्धता वरीवर्ति, यस्याः निवारणाय लौकिकज्ञानस्य अपेक्षा भवति । नैतावता कम्प्यूटरयन्त्रं लौकिकज्ञानयुक्तं सत् ऊहापोहसमर्थं जातम् । अतः भाषानुवादप्रक्रियां परित्यज्य अनुसरण-प्रक्रिया-निर्माणाय बहवः यतमानाः सन्ति । तत्र च साफल्यमपि दरीदृश्यते ।

## 2. अनुवादः अनुसरणं च

### 2:1 अनुवादः

एकस्यां भाषायां स्थितस्य लेखस्य अन्यस्यां भाषायां प्रस्तुतीकरणमेव अनुवाद इत्युच्यते । अनुवादः विषयद्वयमाधारीकृत्य भवति- विश्वसनीयता, सरलता चेति। तत्र यदि अनुवादकस्य दृष्टिः सरलतायां भवति चेत् विश्वसनीयता न भवति । विश्वसनीयतायां दृष्टिश्चेत् सरलता निर्गच्छति । अतः द्वयोः सन्तुलनं दुस्साध्यं भवति, परन्तु अनुवादकस्य प्रभावः तत्र प्रतिबिम्बितः भवति । कदाचित् मूलानभिप्रेताः अर्थविशेषाः अपि तत्र संभाव्यन्ते ।

### 2:2 अनुसरणम्

अनुसरणं नाम सा पद्धतिः, यया मूललेखे निहिताः सर्वे

अपि अभिप्रायविशेषाः अनुसरणभाषायाम् आनेतुं शक्यन्ते । मूलाभिप्रायविशेषं विना अन्यत् किमपि अत्र रञ्जयितुं न शक्यते । यदि च लक्ष्यभाषा, मूलभाषास्थ-लेखाभिप्रायबोधनासमर्था, तर्हि तत्र ते अभिप्रायविशेषाः अनुसरणभाषायां चिह्नैः प्रतिपाद्यन्ते । आवश्यकतायां सत्यां लक्ष्यभाषास्थाने काचित् लक्ष्यभाषादेशीया कृत्रिमा भाषा परिकल्प्यते, यस्यां मूलभाषायाः लक्ष्यभाषायाश्च गुणाः भवन्ति ।

**अनुसरणप्रक्रियायाम् अवधेयाः अंशाः -**

(अ) अनुसरणप्रक्रिया यन्त्रं पाठकं च आश्रित्य भवति । अस्यां प्रक्रियायां यत्र यन्त्रस्य काठिन्यं तत् पाठकेन अपनुद्यते, यत्र पाठकस्य काठिन्यं तदत्र यन्त्रेण अपनुद्यते । तदित्थं इयं प्रक्रिया यन्त्र-पाठक-परस्पराश्रिता भवति ।

(आ) यन्त्रम् अतिबृहच्छब्दकोशं तथा च अतिक्लिष्टान् व्याकरणनियमान् असंख्यानपि धारयितुं, काले काले स्मर्तुं, तान् नियमानाश्रित्य महता वेगेन कार्यं कर्तुं च प्रभवति । परन्तु पूर्वोत्तरसन्दर्भविवेचनं तथा तत्र तत्र लौकिकज्ञानेन सन्देहानां निवारणं च कर्तुं न प्रभवति । पाठकस्तु महत् शब्दजालं धारयितुं तथा च असंख्याकान् क्लिष्टान् व्याकरणनियमान् धृत्वा, स्मृत्वा च वेगेन कार्यं सम्पादयितुं न तथा क्षमः, किन्तु पूर्वोत्तरसन्दर्भपर्यालोचने, मूलभाषावाक्य-भावावगमने स्वीयलौकिकप्रज्ञाम् आश्रित्य तत्र तत्र संशयनिवारणे च समर्थः भवति । एवं च यथा सांख्यदर्शने प्रकृति-पुरुष-संयोगः संसारस्य कारणं तथा यन्त्र-पाठक-संयोगः मूलभाषायाः अवगमने कारणं भवति । यथा प्रकृतिः पुरुषस्य उपभोगाय सर्वं करोति तथैव अनुसारकयन्त्रमपि पाठकस्य मूलभाषास्थान् विषयान् पाठकस्य मातृभाषायां तथा स्थापयति, येषु अभीष्टान् उपयुक्तान् स्वीकुर्यात् सन्दर्भानुगुणं, शिष्टांश्च परित्यजेत्।

**2:3 यान्त्रिक-अनुसरणभाषा-स्वरूपम्-**



यान्त्रिकम् अनुसरणं कस्यापि लेखकस्य लक्ष्यभाषामभिसमानेतुं क्रियमाणः प्रयासः , यत्र अनुसरणभाषा लक्ष्यभाषावत् शुद्धा, व्यावहारिकदृष्ट्या समीचीना च भवेत् इति नियमः नास्ति । परन्तु मूललेखस्य प्रतिबिम्बरूपा भवति । अत्र विशेषेण उल्लेखनीयः अयम् अस्ति यत् मूललेखस्थाः सर्वे अपि अभिप्रायविशेषाः शत-प्रतिशतम् अनुसरण-भाषायां लक्षिताः भवेयुः, येन न केवलं मूलभाषास्था अभिप्रायावगतिः एव प्रयोजनम् अपि तु मूलभाषायाः विशिष्टरचनापद्धतेः उक्तिवैचित्र्यस्य च अवगमनं भवति। यच्च अनुवादे अगम्यम् । एतल्लक्ष्यसाधनार्थम् अनुसरणभाषा लक्ष्यभाषानिकटवर्तिनी काचित् कृत्रिमा अपि भाषा भवितुमर्हति । यत्र कदाचित् मूलभाषास्थाः अभिप्रायविशेषाः चिह्नैः बोधनीयाः भवेयुः, यदा लक्ष्यभाषायां तद्वाचकशब्दाः वा तादृशी पद्धतिः वा न स्यात् ।

## 3. आङ्ग्ल-संस्कृतयोः सम्बन्धः-

भाषाविज्ञानानुसारं संस्कृतम् आङ्ग्लं च भारोपीयपरिवारान्तर्गते। सुविदितमेव संस्कृतलोके यत् आङ्ग्लेय्यां बहवः शब्दाः संस्कृतसमाः सन्ति परन्तु संस्कृतभाषा प्रकृति-प्रत्यय-संश्लिष्टभाषा भवति, आङ्ग्लभाषा तु पदात्मिका असंश्लिष्टा च भवति । अर्थात् संस्कृतभाषायां प्रत्ययाः पार्थक्येन प्रयोगं न अर्हन्ति, परम् आङ्ग्लभाषायां पृथक्पदत्वं भजन्ते । संस्कृतभाषायां पदानां वाक्ये (प्रायशः) स्थाननियमः नास्ति, स्थानमाश्रित्य पदानाम् अर्थबोधः अपि नास्ति । आङ्ग्लेय्यां तु न तथा । किञ्च भारतीयानां संस्कृतज्ञानां स्वस्वमातृभाषाप्रभावेन वा सहजतया वा संस्कृतवाक्यं प्रायः क्रियापदान्तं भवति, किन्तु आङ्ग्लेय्यां क्रियापदं द्वितीयस्थानं प्राप्नोति वाक्ये । कर्तृभिन्नानि कारकबोधकानि पदानि ततः परं प्रयुज्यन्ते, आङ्ग्लभाषावाक्यगतानि पदानि येन क्रमेण सन्ति तेनैव क्रमेण, यथावदनूदितानि भवन्ति चेदपि संस्कृते तद्वाक्यम् अर्थबोधकमेव

भवति। परन्तु भारतीयानां कृते किञ्चित् श्रुतिकटु इव भवेत। यथा -

उदा-1 The fruit would have been eaten by the boy if it was not taken from him.

1. फलम् अभविष्यत् खादितं बालकेन यदि तत् आसीत् न स्वीकृतं तस्मात् । अस्मिन्नेव संस्कृतवाक्ये द्वित्राणि पदानि इतस्ततः कृतानि तर्हि तत् अस्माकं श्रुतिसुभगं भवेत्, यथा-
2. फलं बालकेन अभविष्यत् खादितं यदि तत् तस्मात् आसीत् न स्वीकृतम् ।

प्रायः अत्र अनुसरणभाषारूपं संस्कृतम् आङ्ग्लपदक्रमेण भवति, यस्य अभ्यासः किञ्चित् भारतीयेन पाठकेन कर्तव्यः भवेत्। शक्यते च कर्तुं श्रुतिसुभगमपि यथा द्वितीयं पूर्वोदाहृतं वाक्यम् । यद्यपि पूर्वोक्त-उदाहरणप्रदर्शनेन एकैकस्य आङ्ग्लपदस्य स्थाने तत्तदर्थक-संस्कृतपदसन्निवेशेन इदं कार्यं सुकरमिव संभाव्येत तथापि तत्तथा सुकरं नास्ति । उदाहरणार्थं 'ing'अन्तं पदं स्वीकुर्मः । आङ्ग्लभाषायां 'ing'अन्तस्य पदस्य विविधः प्रयोगः दृश्यते । यथा -

(i) The boy is coming to the school.
(ii) Running is good for health.
(iii) He suffered from running-nose.
(iv) While coming to the Collage Principal enquired about the students.
(v) I saw him going out.

अत्र प्रथमवाक्ये शत्रन्तस्य, द्वितीये ल्युडन्तस्य, तृतीये पुनः शत्रन्तस्य चतुर्थे पञ्चमे च शत्रन्तस्य प्रयोगः कर्तव्यः ।

एवं प्रायः सर्वाणि नामपदानि तथैव क्रियापदानि भवन्ति । यथा-chair इति पदं नामपदम् अपि भवति, क्रियापदम् अपि भवति ।



उदा -

(i) This is a chair.
(ii) He chaired the meeting.

अत्र प्रथमवाक्ये chair सुबन्तं भवति चेत् द्वितीयवाक्ये तिङन्तं भवति ।

यद्यपि आङ्ग्लभाषायां प्रत्ययाः (prepositions) न्यूनाः सन्ति, तथापि तत्तत्-सन्दर्भानुगुणं विविध-अर्थप्रतिपादिकाः सन्ति । यथा- "to" इति धातोः पूर्वं वर्तमानः तुमुन् भवति, नाम्नः पूर्वं वर्तमानः चतुर्थ्यादिविभक्त्यर्थं बोधयति । यथा च संस्कृते उपसर्गविशिष्टः धातुः अर्थविशेषको भवति, तथैव आङ्ग्लेय्यां प्रत्ययान्तः धातुः अर्थविशेषं बोधयति । यथा-call, call off, call for, call out, call in, call on, call up. अत्र call इति धातुः विविधप्रत्ययसंयोजनेन विविधम् अर्थं बोधयति ।

एवम् आङ्ग्लेय्यां कुत्रचित् पदकदम्बः यत्र प्रत्ययः अपि अन्तर्भूतो भवति, विशिष्टार्थबोधको भवति । यथा- in stead of, in spite of, in front of, with in, with out, after all, as well as, as soon as, as such as, as much as etc. अत्र पदकदम्बे अवयवभूतानां पृथगर्थः नास्ति, किन्तु समुदायार्थ एव ।

किञ्च एतादृशाध्ययनेन संस्कृतस्य आङ्ग्लस्य च रचनायां साम्यमपि बोधयितुं शक्यते । तद्यथा-पाणिनिः चतुर्धा तुमुन्-प्रत्ययं निरूपितवान्-

(1) क्रियार्थायां क्रियायां तुमुन् ।
(2) कालसमयवेलासु तुमुन् ।
(3) इच्छार्थेषु समानकर्तृकेषु तुमुन् ।
(4) शकाद्यर्थेषु तुमुन् ।

एवं चतुर्विधः तुमुन् यथावत् आङ्ग्लेय्याम् उपलभ्यते । यथा-

(अ) I came Tirupati to attend the interview.

(आ) This is the time to go.
(इ) I wish to study.
(उ) (a) He starts to eat.
(b) He can do it.
(c) There is something to eat.

एतादृशान् बहून् विशेषान् यन्त्रं कथं जानीयात् कथं वा नियमाः परिकल्पनीयाः भवन्तीत्येतत्सर्वम् अस्य प्रयासस्य सुलभसाध्यतां निराकरोति ।

## 4. अनुसरणप्रक्रिया –

अनुसरणप्रक्रियानिर्माणे मुख्यतया सोपानद्वयम् अस्ति ।
(1) वाक्यविश्लेषणम् (Parcing)
(2) वाक्यनिष्पत्तिः (Generation) इति च ।

**4:1 तत्राद्ये वाक्यविश्लेषणे पुनः सोपानचतुष्टयं, तद्यथा –**
(अ) पदविश्लेषणम् (Morphological Analysis)
(आ) सम्बद्ध-पद-संयोजनम् (Local Word Grouping)
(इ) कारकनिर्णयः (Karaka Assignment)
(ई) असन्दिग्धार्थनिर्णयः (Disambiguation of meaning)

**4:1.1 पदविश्लेषणं ( Morphological Analysis )–**

तत्राद्ये सोपाने स्रोतोभाषायाः (आङ्ग्लभाषायाः) प्रकृतिप्रत्यय-विभागेन पदस्य विश्लेषणं क्रियते । यथा –
"Chair" इति क्रियापदं स्वीकुर्मः तर्हि तस्य पदविश्लेषणम् इत्थं प्रदर्श्यते –
"Chairs" – 1. क्रियावाचकं, प्रथमपुरुषः, एकवचनम् (V/Third Person Singular)
Ex.–He chairs the meeting.



2. नामवाचकं, बहुवचनम् (N/Plural)
Ex.–There are four chairs around the table.

**4:1.2 सम्बद्ध-पद-संयोजनं ( Local word grouping )**

अस्मिन् सोपाने सम्बद्धपदानां संयोजनं क्रियते । आङ्ग्लभाषायाम् एतादृशानि सम्बद्धपदानि बहूनि सन्ति । तानि एव आङ्ग्लभाषायां "Phrases", "Idioms" इति नाम्ना व्यवह्रियन्ते । तत्र पदकदम्बाः (Phrases) द्विप्रकारकाः भवन्ति । यथा – नामपदकदम्बः (Noun Phrase), क्रियापदकदम्बः (Verb Phrase) इति च । तत्र नामपदकदम्बः (Noun phrase) यथा –

"Once upon a time" = "एकस्मिन् समये" इत्यादयः।
क्रियापदकदम्बः (Verb Phrase) यथा–
"Look for" = "अन्वेषणं" इत्यादयः ।
एतादृशानां कृते सम्बद्ध-पद-संयोजनं (Local word grouping) अत्यन्तमावश्यकं भवति ।

**4:1.3 कारकनिर्णयः ( Karaka assignment )**

अस्मिन् सोपाने वाक्यस्थपदानां कारकनिर्णयः क्रियते। वाक्ये कारकाणि सामान्यतः पृथक् पृथक् भवन्ति, कुत्रचित् असमापकक्रियाविशिष्टेषु वाक्येषु एकमेव कारकं कर्तारमपि बोधयति, कर्म अपि बोधयति । तादृशेषु स्थलेषु कारकनिर्णयः अवश्यं करणीयः । यथा –

"I wish to go."
अस्मिन् वाक्ये "I" इति कर्तृकारकं "wish" इति क्रियापदेन अन्वेति । किञ्च "go" इति क्रियापदेन अपि कर्तृत्वेनान्वेति। एतदेव आङ्ग्लभाषायां "Shared karaka" इत्युच्यते । अर्थात् एकस्यैव कारकस्य क्रियापदेन द्वयेन अन्वयः ।

एतादृशः कारकनिर्णयः अपि अवश्यं करणीयः भवति ।

**4:1.4 असन्दिग्धार्थ-निर्णयः ( Disambiguation of meaning )**

अस्मिन् सोपाने अर्थस्य सन्दिग्धता निवार्यते । न केवलम् आङ्ग्लभाषायाम् अपि च सर्वास्वपि भाषासु, एकस्य पदस्य बहवः अर्थाः भवन्ति । यथा "Chairs" इति पदं स्वीकुर्मः। अस्य पदस्य अर्थद्वयमस्ति ।

(1) "Chair" इति क्रियापदं,

(2) "Chair" इति नामपदं च ।

अत्र कस्मिन् सन्दर्भे कस्य अर्थस्य प्रयोगः करणीयः इति वयं जानीमः किन्तु यन्त्रस्य कृते ज्ञातुम् अतीव क्लेशः भवति । एवमेव "to" इति पदं स्वीकुर्मः । अस्यापि न्यूनातिन्यूनम् अर्थत्रयम् अस्ति । यथा -

1. He went to school. सः शालां गतवान्। अत्र "to" इति कर्मकारकं बोधयति ।
2. He gave a book to Mohan. सः पुस्तकं मोहनाय दत्तवान् । अत्र "to" इति सम्प्रदानं बोधयति ।
3. He wants to go to market. सः आपणं गन्तुम् इच्छति । अत्र "to go" इत्यत्र "to" इति तुमुन्नर्थं बोधयति ।

अत्र सन्दर्भानुगुणं "to" इत्यस्य अर्थनिर्णयः करणीयः ।

## 4:2 वाक्यनिष्पत्तिः ( Generation )

स्रोतोभाषायाः विश्लेषणानन्तरं लक्ष्यभूतभाषायाः (संस्कृतस्य) "Target Language" वाक्यनिष्पत्तिः स्रोतोभाषानुगुणं करणीया भवति । आङ्ग्ल-संस्कृत-कोषः, सम्बद्ध-पद-कोशः, नियमाः इत्यादीनां साहाय्येन लक्ष्यभूतभाषायाः वाक्यनिष्पत्तिः क्रियते । अत्र नियमः "Parcer" द्वारा कर्तुं शक्यते । यथा-



"He gave a book to Mohan."

अस्मिन् वाक्ये "give" इति क्रियापदं द्विकर्मकं भवति । "give" इति क्रियापदस्य पूर्वमेकः नामपदकदम्बः पश्चात् नामपदकदम्बद्वयं च भवति । अर्थात् "give" इति क्रियापदस्य नामपदकदम्बत्रिकस्य आकाङ्क्षा वर्तते । अत्र नियमः इत्थम् कर्तुं शक्यते ।

"NP0 give NP1 NP2" इति ।

एवमेव "go" इति क्रियापदस्य नामपदकदम्बद्विकस्य आकाङ्क्षा वर्तते । तद्यथा-

"He goes to school"

"NP0 go NP1" इति ।

एवं सर्वेषामपि क्रियापदानां संस्कृतव्याकरणम् अनुसृत्य तदनुसारेण नियमाः दातव्याः । आवश्यकतायां सत्यां संस्कृतपदानां स्थानपरिवर्त्तनमपि करणीयम् । तेन वाक्यनिष्पत्तिः सम्पूर्णा भवति।

## एतादृशकार्यस्य अपेक्षा

एतादृश-कार्यस्य आवश्यकता महती वर्तते । इदानीं खलु आङ्ग्लभाषा प्रपञ्चभाषा जाता । यद्यपि तस्याः प्राधान्यं न्यूनीकर्तुं प्रयासाः सन्ति तथापि न ते साधकाः । अहरहः ये नूतनाः आविष्काराः ते प्रथमम् आङ्ग्लभाषायामेव प्रकाश्यन्ते । संस्कृतज्ञानां संस्कृतच्छात्राणां च प्रत्यग्रलौकिकज्ञानमपेक्षितमेव । तत्रापि शिक्षाशास्त्रविभागीयच्छात्राणाम् एतादृशं कार्यम् अवश्यमपेक्षितम् । यतः एतावता कालेनापि संस्कृते तद्विषयकग्रन्थानां प्रकाशने तत्तत्संस्थाः असफलाः जाताः, येन तद्विभागीयच्छात्राः महान्तं क्लेशमनुभवन्ति ।

यद्यपि कार्यमिदं क्लिष्टं तथापि शक्यमेव । यतः एतादृशकार्याणि भारतीयभाषाविषये क्रियमाणानि फलप्रदानि सन्ति। यद्यपि एतादृशः प्रयासः इदमिदानीं पल्लवितः अस्ति अचिरादेव पुष्पितः फलितश्च भविष्यति इति वक्तुं शक्यते ।

# संस्कृतप्रसारपरिषद्, आरा
## संक्षिप्तम् इतिवृत्तम्

- स्थापनातिथिः 22.2.1987
- निबन्धनसंख्या 424/1994-95
- कार्यालयः - संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम्, प्रकाशपुरी,
  आरा (विहारः) 802301 दूरभाषसंख्या - (06182) 24193
- आरण्यकम् (अर्धवार्षिकं संस्कृतशोधपत्रम्, प्रतिवर्षं मार्च, सितम्बरमासयोः प्रकाश्यमानम्)
- पञ्जीकरणसंख्या - RNI 58951/94
- संस्कृतविदुषां सम्मानः (प्रतिवर्षं क्रियमाणः)। अथ सम्मानिताः विद्वांसः -

| | | सम्माननवर्षम् |
|---|---|---|
| 1. | पण्डित कमलाकान्त उपाध्यायः | 1988 |
| 2. | पण्डित चन्द्रशेखर पाठकः | 1989 |
| 3. | पण्डित सीताराम उपाध्यायः | 1989 |
| 4. | पण्डित सभानाथ पाठकः | 1990 |
| 5. | पण्डित रङ्गनाथ पाण्डेयः | 1990 |
| 6. | पण्डित रामेश्वरनाथ पाठकः | 1992 |
| 7. | पण्डित केदारनाथ शुक्लः | 1993 |
| 8. | पण्डित जनार्दन मिश्रः | 1994 |
| 9. | पण्डित रामनरेश त्रिपाठी | 1995 |
| 10. | पण्डित रामनारायण पाण्डेयः | 1995 |
| 11. | पण्डित रामप्रवेश त्रिपाठी | 1996 |
| 12. | पण्डित गिरिजानन्दन मिश्रः | 1997 |
| 13. | पण्डित अम्बिकादत्त त्रिपाठी 'व्यासः' | 1998 |
| 14. | पण्डित डा० श्यामानन्द झा | 1999 |
| 15. | पण्डित व्रजभूषण मिश्र 'आक्रान्तः' | 2000 |
| 16. | पण्डित जगदीश्वर प्रसाद मिश्र 'नलिनः' | 2000 |

- प्रकाशितानि - 12 पुस्तकानि (विवरणं शोधपत्रस्य पृष्ठभागे)
- संस्कृतकविगोष्ठी-संस्कृतविचारगोष्ठीनाम् आयोजनम्
- संस्कृतसम्भाषणशिविराणाम् आयोजनम्
- महाविद्यालय/उच्च-मध्य-प्राथमिकविद्यालयस्तरीय-संस्कृतप्रतियोगितानाम् आयोजनम्
- वर्ष 2000 तः 'अन्नपूर्णादेवीस्मारिका संस्कृतप्रतियोगिता' द्वारा प्रतियोगितापुरःसरं पुरस्कार-प्रमाणपत्रादिवितरणम् ।
- संस्कृतवर्षम् (1999-2000) उपलक्ष्य केन्द्रसर्वकारस्य अनुदानेन संस्कृतशिक्षकप्रशिक्षणवर्ग - 51 संस्कृतसम्भाषणशिविर-संस्कृतसङ्गम (14 अप्रैल, 2000) इति संस्कृतसम्भाषण-अभियानसञ्चालनम् । ❖



# वैयाकरणनिकाये
# स्वतःप्रामाण्यमागमप्रमाणस्य

डॉ० मङ्गलारामः

**प्रमाणम्** - प्रोपसर्गपूर्वकमाङ्धातोर्ल्युट्प्रत्यये कृते सति प्रमाणशब्दो निष्पद्यते, तथा च व्युत्पत्तिः 'प्रमीयतेऽनेनेति करणार्थाऽभिधानो हि प्रमाणशब्दः'[1] । प्रमेयावगमस्योत्कृष्टं साधनं प्रमाणं यतः प्रमेयसिद्धिः प्रमाणाद्धि भवति । व्याकरणशास्त्रे प्रमेयस्तावत् शब्दापशब्दविवेकः । प्रमाणं तावत्प्रमाकरणं प्रमाणम् । यथार्थानुभवः प्रमा । क्रियायां प्रकृष्टोपकारकं करणम् ।

**शब्दस्य स्थितिः** - व्याकरणशास्त्रे शब्दस्य नित्यत्वं प्रतिपादितमस्ति । यथा हि तत्र वाक्यपदीये प्रथमकारिकायाम् -

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥[2]**

वस्तुतः शब्दस्य तात्त्विकरूपमेव सत्यं व्यावहारिकं रूपं वैखरी वाग्रूपाऽस्ति या प्रयोक्तुरुच्चारणानन्तरं परश्रवणयोग्या सती आकाशदेशे प्रसृता भवति । अत्र जगति कस्यचिदपि वस्तुनः पदार्थस्य वा सङ्केतग्रहाय वक्ता यान् शब्दानुच्चारयति ते शब्दा द्विविधाः साधुरसाधुश्च । धर्मसाधनत्वेन प्रथिताः गवादयः शब्दाः साधवोऽधर्मसाधनत्वेन प्रथिताः गोणीत्यादयः शब्दा असाधवः । 'एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति' तथा 'तेऽसुराः हेलयो हेलय इति कुर्वन्तः पराबभूवुः । तस्माद् ब्राह्मणेन न म्लेच्छितवै नापभाषितवै । म्लेच्छो ह वा एष यदपशब्दः'[3] इति श्रुतिभ्यामपि साधुशब्दस्य प्रयोगकरणमेवोचितम् ।

**आगमप्रमाणम्** - कस्यचिदपि शास्त्रस्य निर्माणं किमपि

प्रयोजनमधिकृत्य भवति । व्याकरणस्यापि एकं प्रयोजनं साधुत्वासाधुत्वविवेकरूपम् । अत एव भगवता पाणिनिनाऽन्यैश्च सम्प्रदायगता साधुत्वविषयिका व्याकरणशास्त्रीया निर्मितिः कृता । सम्प्रति जिज्ञासा भवति यत् पाणिन्याद्याचार्यनिर्दिष्टाः शब्दा एव कथं साधवः ? अन्येषां साधुत्वं कथन्न ? अत्र वाक्यपदीयकारो निरूपयति–

**न चागमादृते धर्मस्तर्केण व्यवतिष्ठते ।**
**ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम् ।।**[4]

वस्तुतः यागादिधर्मा अपि आगमप्रमाणं विना न भवन्ति सिद्धाः तथा च पाणिन्याद्यृषीणाम् अतीन्द्रियज्ञानम् अप्यागमोक्तविधानेनैव जातमस्ति ।

अयं भावः 'यागात्स्वर्गं भवति'– न ह्येतदनुमानेन सिद्ध्यति । अनुमानन्तु तदैव यत्र साहचर्यदर्शनेन व्याप्यव्यापकभावो गृहीतो भवति । अतः यथा अग्नेर्दाहकत्वं तत्स्वभावस्तथैव यागात्स्वर्गो भवतीत्यत्र यागस्याप्यप्रत्यक्षरूपेण स्वर्गप्राप्तिः स्वभावः । अत्राऽऽगमेन यागस्वर्गयोः व्याप्यव्यापकभावत्वेऽपि व्याकरणागमः शब्दस्य साधुत्वनिर्णये बाधको न भवति । ऋषीणाम् आगमोक्तानुष्ठानेनैव दिव्यदृष्टिरपि गता । अतस्तेषामपि ज्ञानमागममूलकम् अतः न कश्चिदपि तर्कः शब्दसाधुत्वविषये व्याकरणागमस्य बाधकः । इत्थमागमस्तर्कात् प्रबलतरः ।

**तर्कस्याऽवरत्वम्** – धर्मप्रतिपादका आगमा लोकप्रसिद्धाः शिष्टाचार्यैर्ज्ञाताश्च सन्ति । अतस्तत्र तर्कस्य नास्ति महत्त्वं यतः लोकप्रसिद्धिविषये विरोधे सति तर्कस्यैव बाधो भवति – **'नागमस्तर्कबाध्यः'**[5]।

एषां तर्काणां न केवलमागमे अपितु लोकेऽपि विफलता सिद्धा भवति । यदा पदार्थशक्तयोऽवस्थादेशकालानां भेदेन विविधा भवन्ति तदाऽनुमानद्वारा तत्तत्पदार्थेषु तत्तच्शक्तीनामनुमितिर्दुर्लभा । इत्थं यदि शक्तयोऽवस्थादेशकालभेदाद् भिन्नास्तर्हि जलत्वस्य हेतुत्वे जले शीतत्वानुमानं कथम् ? उष्णत्वानुमानं कथम् ? अतः यदि लौकिकपदार्थेषु



तर्कस्येयं दशा तदा धर्मनिर्णये आगमनेत्रं विना न हि अस्ति कश्चित्पन्थाः। एवञ्च तत्तद्वस्तूनां तत्तत्क्रियासु शक्तीनां नियतत्वेऽपि विशिष्टद्रव्यसम्बन्धात् सा शक्तिर्विनश्यति । अतः 'अयं दहति अग्नित्वाद्' इत्यनुमानमपि चन्द्रकान्तमणिसान्निध्ये व्यर्थमेव भवति । इत्थं वस्तुनः स्वभावावबोधनाय व्यर्थस्तर्कः, आगमः श्रेष्ठः । यथोक्तं भावप्रदीपे–

'अयं दहत्यग्नित्वादित्यादिभिरनुमानैर्न शक्यते दाहजनकत्वमनुमातुं चन्द्रकान्तादिप्रतिबन्धकद्रव्यसमवधानेऽग्नित्वस्य दाहजनकत्वव्यभिचारादिति वस्तुस्वभावो नानुमानादवगन्तुं शक्यः किन्त्वागमादेवेति भावः'।[6]

महापुरुषाणां तर्कैरपि धर्माधर्मनिर्णयोऽसम्भवः, यतः अनुमितिकरणे निपुणैः कपिलादिमहर्षिभिर्येषां सिद्धिः कृता तेषामेव कणादादिमहर्षिभिः प्रतिलोमता प्रदर्शिता । उदाहरणतः, महर्षिकपिलेन यत्नपूर्वकेणाऽनुमानेन जगतः कारणं प्रधानं प्रकृतिरेवेति साधिता, तथैव कणादादिभिः स्वकीययुक्तिभिः परमाणुरेव जगत्कारणमित्यङ्गीकृतम् । अतः कुशलोऽनुमाताऽप्यनुमानद्वारा धर्माधर्मविषये निर्णेतुमसमर्थः । भर्तृहरिणाप्युक्तम्–

**यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः ।**
**अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते ।।**[7]

**आर्षज्ञानस्य द्वैविध्यम्** – आर्षज्ञानं प्रमाणत्वेऽप्यागममूलकम्। तच्च द्विविधं लौकिकमलौकिकञ्च । लौकिकं ज्ञानं मणिरत्नादीनां मूल्यस्य तारतम्यज्ञानं स्वर्णकारेष्वेव भवति । एतद् ज्ञानं परेभ्यो बोधयितुं ते भवन्त्यसमर्थाः । यतः कस्यचिदपि वस्तुनो वैशिष्ट्यज्ञानमभ्यासादेव भवति। अभ्यासाज्जायमानं ज्ञानं न भवति अनुमानं व्याप्तिज्ञानजन्याभावात्–

**परेषामसमाख्येयमभ्यासादेव जायते ।**
**मणिरूप्यादिविज्ञानं तद्विदां नानुमानिकम् ।।**[8]

इदमभ्यासनामकं ज्ञानं प्रत्यक्षानुमानाभ्यां भिन्नं लौकिकसमाधि-जन्यञ्च । अत एव इदमन्यमेव प्रमाणम्–

'तमिमं श्वो मे भ्राताऽऽगन्तेति हृदयं मे कथयतीति कन्यका-ज्ञानमिव लौकिकमार्षमित्याचक्षते'।[९]

अलौकिकं ज्ञानं लौकिकाद्भिन्नं प्रत्यक्षानुमानाभ्यां नावगमयोग्यम्। लौकिकप्रसिद्धपितृरक्षःपिशाचानां सिद्धयः कर्माधीना एव भवन्ति । यथोक्तं वाक्यपदीये-

**पितृरक्षःपिशाचानां कर्मजा एव सिद्धयः ।[10]**

इदं द्विविधं महर्षिज्ञानं तपसा समुत्पन्नमदृष्टजन्यमस्ति, नास्ति तर्कजन्यम् । यद्यपि आर्षज्ञानमिन्द्रियजन्यत्वाभावान्नास्ति प्रत्यक्षं, व्याप्ति-ज्ञानजन्यत्वाभावान्नास्ति आनुमानिकं, सादृश्यज्ञानजन्यत्वाभावान्नौपमानिकं, शब्दज्ञानजन्यत्वाभावाच्च नापि शाब्दं, तथापि रजोगुणतमोगुणाभ्याम् अनभि-भूतचित्तानां महर्षीणामन्तःकरणे भूतभविष्यत्कालिकं जायमानं ज्ञानं प्रत्यक्षवदेव भवति-

**अविर्भूतप्रकाशानामनुपप्लुतचेतसाम् ।**
**अतीतानागतज्ञानं प्रत्यक्षान्न विशिष्यते ॥[11]**

यद्यपि महर्षीणामेतत्प्रत्यक्षज्ञानं नेन्द्रियजन्यं 'तथाप्यार्षज्ञानं मिथ्या इन्द्रियासम्बद्धविषयकत्वे सति प्रत्यक्षत्वात्' एतेनानुमानेन बाधितं न भवति, यतः यज्ज्ञानमिन्द्रियाग्रहणयोग्यं यच्च प्रत्यक्षमूलकेनानुमानेनाप्यग्राह्यं तत्परमाणुरूपेण शब्दब्रह्मरूपेण दैवतरूपेण महर्षीणामलौकिकेन तपसा सञ्जातं तेषां तज्ज्ञानमव्यवस्थितानुमानेन बाधितत्वरहितम्-

**अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा ।**
**ये भावान् वचनं तेषां नानुमानेन बाध्यते ॥[12]**

**योगिनां प्रत्यक्षं ज्ञानम्-** यो मनुष्यो यस्य योगिनः प्रत्यक्षत्वं स्वकीयमपि प्रत्यक्षं स्वीकरोति सः अन्यस्य कस्यचिदपि तर्कशक्त्या न संकर्षितो भवति यतः हृदयस्थपूर्वकालिकं प्रत्यक्षमपहाय परकालिके तर्के तस्य श्रद्धा न भवति । अतएव 'इदं पुण्यमिदं पापम्' अत्र विषये ऋषीणां यत्कथनं तत्र आ ब्राह्मणात् चाण्डालपर्यन्तो लोकः पूर्णरूपेण



विश्वसिति । अतः तस्य लोकस्य कृते शास्त्रस्य प्रयोजनमल्पमेवास्ति । यथोक्तं भर्तृहरिणा-

**इदं पुण्यमिदं पापमित्येतस्मिन् पदद्वये ।**
**आचाण्डालं मनुष्याणामल्पं शास्त्रप्रयोजनम् ॥[13]**

इत्थं सिद्ध्यति यदार्षज्ञानमागममूलकत्वात्स्वतःप्रमाणभूतम् ।

**प्रामाण्यमागमानाम्** - प्रामाण्यं नास्ति तर्काधीनमागमानां किन्त्वागमस्तर्कापेक्षया प्रबलः स्वतःप्रमाणभूतः । यथाऽविच्छेदरूपेण स्वयंप्रकाशश्चैतन्यो भवति तथैव वेदागमोऽप्यविच्छेदरूपेण स्वतःप्रमाणम्। एवंविधस्वतःप्रमाणेष्वागमेषु श्रद्धां दधानो लोकस्तर्कवादत आगमप्रमाणात् श्रद्धां न जहाति-

**चैतन्यमिव यश्चायमविच्छेदेन वर्तते ।**
**आगमस्तमुपासीनो हेतुवादैर्न बाध्यते ॥[14]**

अयमाशयः यत् 'अहमस्मि' इति ज्ञानान्तरं यथा 'अहं नास्मि' एतद्विपरीतं ज्ञानं न भवति तथैव श्रुतिस्मृतिरूप आगमोऽनादिपरम्परया प्रमाणरूपेण स्वीकृतो वर्तते । अस्य प्रामाण्ये नास्ति कस्यचिदपि सन्देहः। इत्थमागमैकप्रमाणनिष्ठो लोकस्तार्किकवादैर्न्यायमार्गतो न परिहीयते ।

**धर्माधर्मयोर्निर्णयः** - धर्माधर्मयोर्निर्णयोऽपि नास्त्यनुमानाधीनम्। यथा दुर्गममार्गे कश्चित्प्रज्ञाचक्षुः कस्यचिदपि साहाय्यं विना हस्तस्पर्शेन सर्वत्रोच्चावच्चत्वसहितं धरातलं स्वीकृत्य धावति तर्हि पतनरूपेण तस्य फलं प्राप्नोति तथैव प्रत्यक्षानुमानाभ्याम् अनवगमयोग्ये दृष्टादृष्टफलप्रदायके कर्मण्यागमरूपिणं सहायकं विनाऽनुमानाधारेण क्रियानिष्पादकस्य नरस्य पतनं नास्ति दुर्लभम्-

**अनुमानप्रधानेन विनिपातो न दुर्लभः ।[15]**

अत एव निष्कर्षतः प्रतिपादयितुं शक्यते यदपौरुषेयं शास्त्रं शिष्टाचारपरम्परया स्वीकृतं स्मृतिप्रमाणं हृदि निधाय पाणिनि-कात्यायनपतञ्जलिमुनिभिर्व्याकरणशास्त्रस्य सङ्ग्रन्थनं कृतम् ।

यथोक्तमप्यस्ति वाक्यपदीये-

तस्मादकृतकं शास्त्रं स्मृतिं च सनिबन्धनाम् ।
आश्रित्यारभ्यते शिष्टैः शब्दानामनुशासनम् ॥[16]

## सन्दर्भसूची


1. वात्स्यायनः, न्यायभाष्यम्, 1.1.3
2. भर्तृहरिः, वाक्यपदीयम् (चौखम्बा संस्कृत संस्थानम्, पञ्चमं संस्करणम्, वाराणसी, 1984), ब्रह्मकाण्डः, कारिका 1
3. पतञ्जलिः, व्याकरणमहाभाष्यम्(मोतीलाल बनारसीदास, प्रथमं संस्करणम्, दिल्ली, 1968), पस्पशाह्निकम्, पृष्ठे 7
4. वाक्यपदीयम्, ब्रह्मकाण्डः, कारिका 30
5. वाक्यपदीयम्, ब्रह्मकाण्डः, कारिका 31
6. शुक्लः श्रीसूर्यनारायणः, वाक्यपदीयभावप्रदीपः (चौखम्भा संस्कृत संस्थान, वाराणसी, 1984) पृष्ठे 53
7. वाक्यपदीयम्, ब्रह्मकाण्डः, कारिका 34
8. तत्रैव, कारिका 35
9. वाक्यपदीयभावप्रदीपः, पृष्ठे 55
10. वाक्यपदीयम्, ब्रह्मकाण्डः, कारिका 36
11. तत्रैव, कारिका 37
12. तत्रैव, कारिका 38
13. तत्रैव, कारिका 40
14. तत्रैव, कारिका 41
15. तत्रैव, कारिका 42
16. तत्रैव, कारिका 43


❖



# वाल्मीकीयरामायणे जलतत्त्वम्

घनश्याम पाठकः

प्रकृतिः नूनमेव स्वसन्तुलनं स्थापयितुं पारयति इति वयं जानीमः। तथापि प्रेयःकार्येषु दत्तचित्ता वयं प्रकृतेः घटकानां निरन्तरं दोहनं कुर्वन्तः स्मः । एतदर्थमेव प्रकृत्याम् असन्तुलनं भवति । वस्तुतः जीवनस्य यत् सरसचित्रणं वयं काव्येषु अवगच्छामः तत्तु अस्मद्भौतिकसुखलिप्सया दूरे तिष्ठति । प्रसङ्गेऽस्मिन् प्रयासः क्रियते चेदपि कश्चित् रचनात्मको विकासः न दृश्यते । वैज्ञानिके युगेऽस्मिन् भौतिकं सुखं प्राप्तुं वयं सिद्धाः किन्तु स्वच्छे प्राकृतिकपर्यावरणे सहजतया प्राप्येभ्यः जीवनदायितत्त्वेभ्यः वयं वञ्चिताः । अत एव साम्प्रतं पर्यावरणसंरक्षणस्य प्रासङ्गिकता प्रतिभाति । 'ॐ द्यौः शान्तिरन्तरिक्षं शान्तिः' इत्यनेन स्पष्टं यत् पर्यावरणसंरक्षणार्थं वैदिककालतः एव एका स्वस्थविचारधारा प्रचलति । इह हि आदिकविना वाल्मीकिना विरचिते आदिकाव्ये रामायणे पर्यावरणसम्बन्धिजलतत्त्वस्य विमर्शः क्रियते ।

जलं प्रकृतेः अमूल्यम् अवदानम् । जलं विना जीवनं न सम्भाव्यते । मानवः स्वकीयायाः विविधायाः आवश्यकतायाः पूर्त्तये जलस्य प्रयोगं करोति । रामायणे काले जलं न केवलं पेयवस्तु आसीत् अपितु एतस्य प्रयोगः यज्ञादिषु[1] सुरक्षाविषये[2] तथा च आतिथ्यसत्कारक्रमे[3] मुख्यतया भवति स्म । यज्ञेषु ऋषयः बह्वीनां स्वच्छजलयुक्तानां नदीनाम् आवाहनं कुर्वन्ति स्म । नगरं परितः दीर्घिकाः जलपूर्णपरिखाः नगररक्षणे सहयोगिन्य आसन् इत्यतः लङ्कायाम् आक्रमणात् पूर्वं वानराः पर्वताग्रैः काष्ठैश्च सलिलाशयाः परिखाः पूरितवन्तः ।[4] भ्रातृमेलनार्थम् आगच्छतः च भरतस्य आतिथ्यक्रमे भरद्वाजाहूताः नद्यः स्वकीयं निर्मलं जलम् अस्रवन् । शुद्धपेयजलार्थं नानापुष्पाच्छादिताः दीर्घिकाः वाप्यः पुष्करिण्यः सरांसि तथा च रम्याः कूपाः आसन् ।[5]

सर्वेषां जलाशयानां यत् स्वरूपं कविना अदर्शि तद्विलक्षणमेव। सरोवरस्य जलं वैदूर्यमणिरिव स्वच्छश्यामम् । तस्मिन् जले नानाविधानि पद्मानि पुनश्च सरोवरस्य तटे उत्पद्यमानाः विविधद्रुमाः सरोवरस्य श्रीवृद्धिं कुर्वन्ति।[6] वापीनां चित्रणं कुर्वन् निगदति महाकविः-

**हंसकारण्डवाकीर्णा वापीः पद्मोत्पलावृताः ।[7]**

नदीनाम् अशैवलं जलं दुग्धमिव निर्मलम् । तस्मिन् च जले हंसानां केलिः पुनश्च नदीतटे मयूरनृत्यं हृदयाह्लादकरम् । प्रायशः नद्यः जलपूर्णाः तथा च जलं हंससारसपुष्पादिभिः सुशोभितम् । वस्तुतः गङ्गाजलस्य यत् वर्णनं रामायणे उपलभ्यते तस्य साम्प्रतिकेन गङ्गाजलेन किमपि साम्यं न लक्ष्यते ।[8] गङ्गाविषये कविराह-

**त्रीन् पथो भावयन्तीति तस्मात् त्रिपथगा स्मृता ॥[9]**

आशयोऽयं यत् आकाश-पृथिवी-पाताल-पथान् पवित्रान् कुर्वती नित्यं च प्रवहन्ती एषा 'त्रिपथगा' नूनमेव लौकिकपापमोचिनी वर्तते । अपरे च स्थले 'गङ्गा हिमालयात् प्रभवति' इति कारणतः कविः 'गङ्गा हिमालयस्य ज्येष्ठा पुत्री' इत्युक्त्वा वैज्ञानिकस्य पक्षस्य समर्थनं करोति । क्वचित् वर्षावर्णनक्रमे जलतत्त्वस्य मानवीकरणं विधाय कविः एतद्व्यापकतां तु क्वापि **'सुग्रीवस्य नदीनां च प्रसादमभिकाङ्क्षयन्'**[10] इत्यनेन नदीनां जलं शरदृतौ नैसर्गिक-रूपेण स्वच्छतामाप्नोति इति उल्लेखो विद्यते ।

वाल्मीकीये रामायणे जलस्य अपरः प्रयोगः कृषिकार्येषु अपि दृश्यते । **'काले वर्षति पर्जन्यः'**[11] तथा च **'कामवर्षी च पर्जन्यः सुखस्पर्शश्च मारुतः'**[12] इत्येताभ्यां प्रमाणीभवति यत् मेघः समयानुकूलं वर्षति चेत् कृषिरपि समुन्नता इत्यतः दुर्भिक्षस्य भयं नासीत् । इदानीं कृषेः समुन्नयनार्थं 'वाटर-शेड' विकासकार्यक्रमः सर्वकारपक्षतः सञ्चालितो वर्तते । अपरश्च एकः कार्यक्रमः 'जलसम्भरविकासकार्यक्रमो'ऽपि प्रवर्तते। एताभ्यां कार्यक्रमाभ्यां जलसंरक्षणम् अनुर्वरायाः भूमेः विकासस्य तथा च मरुस्थलेष्वपि जलद्वारा हरितक्रान्तेः सम्भावनाः सम्मिलिताः सन्ति । तदपि कश्चित् अपेक्षाकृतलाभः न । रामायणकाले जलप्रदूषणस्य चर्चा



काव्यशैल्यामेव लभते । यथा-कपिवायुसमीरितानां द्रुमाणां विविधपुष्पवृक्षाश्च समुद्रे अपतन् तेनैव प्रदूषणम् ।[13] परं तु खाड़ी-युद्धकाले समुद्रे पतितेन पुष्कलतैलेन अपरिमिताः जलीयजीवाः मृताः, जलमपि प्रदूषितम् । संयुक्त-राष्ट्रपर्यावरणस्य (युनाईटेड नेशंस एन्वायरमेंट प्रोग्राम) अधीनं सर्वप्रथमं सप्तदशदेशेषु विशंत्युत्तरैकशततमाः प्रयोगशालाः संस्थापिताः । एताः प्रयोगशालाः सागरप्रदूषणं वारयन्ति । वस्तुतः विश्वकल्याणाय सागरः प्रदूषणमुक्तः स्यात् ।

भारतवर्षे उपलब्धजलस्य सप्ततिः प्रतिशतं जलं प्रदूषितमेव । यथा उक्तं यूरोपीयेण वैज्ञानिकेन सी० एस० साउथविकमहोदयेन यत् 'मानवक्रियाकलापैः तथा च प्राकृतिक(जलीय)प्रक्रियाभिः जलस्य रासायनिक-भौतिक-जैविकगुणेषु परिवर्तनमेव प्रदूषणम् ।' एतद्द्वारा पुष्टिर्भवति यत् या निर्मलसलिला गङ्गा रामायणकाले वन्द्या तथा च कलिकल्मषं धुनोति सा अपि प्रदूषिता । प्रदूषितगङ्गाजलपरिशोधनार्थं 'केन्द्रीय-गङ्गा-प्राधिकरणम्' इति एका योजना सङ्घटिता । नर्मदा-जलप्रदूषणस्य[14] उल्लेखः संकेतयति यत् तदानीमपि जलप्रदूषणं भवति स्म । किन्तु विविधाः जलीयजीवाः एव तदानीं जलस्य स्वच्छतायाः रक्षणं कुर्वन्ति स्म, न प्रचलिताः आसन् एतादृश्यः विकासयोजनाः । निष्कर्षतः रामायणे उल्लिखितं जलतत्त्वम् अद्यापि प्रासङ्गिकम् । सांस्कृतिक-चेतनायाः अभावेनैव कदाचित् मेघः अम्लीयवर्षां करिष्यति तु कदाचित् ओषधीयजलयुक्ता जाह्नवी विगतप्रभावा भविष्यतीति शम्।

**सन्दर्भ-सूची :-**


| | | | | | |
|---|---|---|---|---|---|
| 1. | रामायणम्, | 7/90/15 | 2. | रामायणम्, | 6/42/16 |
| 3. | '' | 2/91/15 | 4. | '' | 6/42/16 |
| 5. | '' | 3/55/12 | 6. | '' | 4/1/3 |
| 7. | '' | 5/2/12 | 8. | '' | 2/50/12-26 |
| 9. | '' | 1/44/6 | 10. | '' | 4/28/63 |
| 11. | '' | 7/99/13 | 12. | '' | 6/128/103 |
| 13. | '' | 5/1/53 | 14. | '' | 7/31/35½ |

एकं चिन्तनम्

# पर्याप्तम् अपर्याप्तं वा ?

गोपबन्धु मिश्रः

'पर्याप्तं पर्याप्तम्........ ।' भोजनकाले पायसं यच्छन्तीं पत्नीं ब्रुवन् आसीत् रमेशः । ततः अधिकं पायसं नेष्यते, सन्तुष्टिः च जाताऽस्तीति आशयः आसीत् तस्य । पत्नी सुशीला अवदत्–'भवतः कृते पायसं पर्याप्तं जातम् अथवा अपर्याप्तम् ?'

रमेशः–'कथम् अपर्याप्तम् ? पर्याप्तमेव जातम् । अधिकं नेच्छामि।' ''तर्हि 'अपर्याप्तम्' इति वक्तव्यम् आसीत् किल ?''–सुशीला अवदत् । 'कथं विपरीतं वदसि ?'– रमेशः स्वस्य 'पर्याप्त'प्रयोगे निःशङ्क आसीत् ।

'इदानीं पायसं खादतु । अनन्तरं वदिष्यामि' इति तात्कालिकीं विवादविरतिम् आनयत् सुशीला ।

भोजनानन्तरं सुशीला रमेशं गीतायाः प्रथमाध्यायस्य दशमं श्लोकं दर्शितवती–

**अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् ।**
**पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् ॥**

अत्र दुर्योधनः युद्धस्य प्रारम्भकाले स्वस्य प्रभूतं सैन्यबलम् द्रोणाचार्यं दर्शयन् वदति–पितामहेन भीष्मेण अभिरक्षितम् अस्माकं विपुलं सैन्यबलम् 'अपर्याप्तम्' अर्थात् अ-परि-आप्तम् (परितः आप्तं व्याप्तं पर्याप्तं सीमितं वा, न पर्याप्तम्=अपर्याप्तम्) अपरिसीमितम् आवश्यकतायाः अधिकं वा अस्ति । एतेषां पाण्डवानां तु ('तु' कथनेन पाण्डवानां न्यूनता दर्शिता अस्ति) भीमरक्षितं सैन्यबलं 'पर्याप्तम्' परिसीमितम् आवश्यकतायाः बहुन्यूनं वा अस्ति । अत्र दुर्योधनेन स्वबलस्य श्रेष्ठत्वं व्यापकत्वम् अजेयत्वम् अनाकलनीयत्वं वा प्रदर्शितम्, एवमेव पाण्डवबलस्य हीनत्वं सीमितत्वम् आकलनीयत्वं च विमृष्टम् । तुलनात्मके प्रयोगेऽस्मिन् क्रमशः अपर्याप्त-पर्याप्तशब्दयोः प्रयोगः द्रष्टव्यः किल ? – स्ववक्तव्यं समापितवती आसीत् सुशीला ।

'पर्याप्तम् अपर्याप्तम्, न हि न हि अपर्याप्तं पर्याप्तम्' इति किमपि किमपि आत्मगतं चिन्तयन् आसीत् रमेशः । ❖



# वेदे कालस्याध्ययनम्

डा० वि० रामकृष्ण भट्टः

अपारे सागरे चराचरात्मके कालशब्दाभिधेयं किमपि वस्तु वर्तत इति सर्वथा सत्यं वचः । ''संवत्सरः प्रत्यक्षेण'' इति मन्त्रांशभाष्ये सायणः–''संवत्सरः प्रत्यक्षेण प्रदृश्यते आविपालगोपालं हि सार्वजनीनानुभवेन व्यवह्रियमाणत्वात्'' इति नेत्राद्यगोचरमपि वस्त्विदं विचित्रस्वभावकं छायेव मनुकुलमनुसरति । स्थावरजङ्गमात्मकमिदं सर्वजगत् कालाधीनम् । उत्पत्तिमरणादिधर्माश्च तद्वशाः ।

क्षणकलामुहूर्त्तदिवसपक्षमाससंवत्सरादिविविधपदवाच्यः इन्द्रियावेद्योऽयं कालः मायावीव बहुविधविचित्रकार्यं कारयति । समस्तलौकिकालौकिकव्यवहारास्तत्प्राधान्येनैव प्रविचलन्ति ।

दूरदर्शनाकाशवाणीकार्यक्रमाः, ट्रेन्बस्विमानादिवाहनानां गमनागमनम्, अस्माकं दैनन्दिनकार्यकलापः, लतावृक्षादीनां फलपुष्पोद्गमः, किमुत इतिहासश्च A. D., B. C. इत्यादिरीत्या समयनिबद्धाः । संवत्, विक्रमशकः, शालिवाहनशकः, ईशवर्षं, जनवरीत्यादिमासाः सौरमान-चन्द्रमानादिव्यवहाराः कालसङ्घटिताः । ''दशमे मासि सूतवे'' इति श्रुतिवचनात् गर्भवासोऽपि कालचोदितः ।

कालप्रभावप्रभाविता वेदाः । दुग्धे रूपमिव, गुडे रस इव भिन्नोऽपि अविनाभावेन भासते, तथा भिन्नश्चापि कालोऽभिन्नाङ्गमिव वेदेषु राराजते कालः । ह्रस्वदीर्घप्लुतादिसंज्ञाविशेषसुगन्धगन्धित-अकारादि-वर्णपुष्पमालालङ्कृताः खलु वेदाः । उदात्तानुदात्तादिस्वररञ्जितानि वेदपदानि। ह्रस्वदीर्घाद्युदात्तादिसंज्ञाः कालनियमिताः ।

**उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः ।**
**ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अपि ॥**
(पा. शि.)

एकमात्रद्विमात्रत्रिमात्रकालानुसन्धाननिमित्तह्रस्वदीर्घादिसंज्ञा भवति। कश्चन सूक्ष्मसमयः - एकमात्रकः, सूक्ष्मसमयविशेषः द्विमात्रकः, एवमन्यः सूक्ष्मसमयः त्रिमात्रकः इत्यादिनिर्णयप्रयोजकं चाषवायसमयूरादि-पक्षिविशेषरुतम् ।

**चाषोक्त एकमात्रः स्याद्वायसेन द्विमात्रिकः ।**
**मयूरेण त्रिमात्रश्च जानीयात्काललक्षणम् ॥** (व्या. शि.)
एवं च
**चाषस्तु वदते मात्रां द्विमात्रं त्वेव वायसः ।**
**शिखी रौति त्रिमात्रं तु नकुलस्त्वर्धमात्रकम् ॥** (पा. शि.)

अर्थात् चाषवायसादिविहगनादकालसमकालक्रमेण ह्रस्वदीर्घादिसंज्ञा भवति । एवं ''तेन अकारेण तुल्यकालस्वरश्च ह्रस्वसंज्ञो भवति । इकारः, उकारः'' ''ह्रस्वात् द्विगुणकालस्वरो दीर्घो भवति, यावान् कालः तावन्तः त्रिगुणाः प्लुतसंज्ञा भवन्ति'' इत्यादि (तै. प्रा. शा.)

सेकण्ड्, मिनिट्, अवर् इति आधुनिकसमयसूचकपदानि विद्यन्ते तथा निमेषक्षणकलामुहूर्त्तकाष्ठाहोरात्रपक्षमासर्तु-अयनसंवत्सरयुग-कल्पादिशब्दभेदेनाणुमहत्कालविशेषो मन्त्रब्राह्मणात्मके वेदे श्रूयते ।

**कला मुहूर्त्ताः काष्ठाश्चाहोरात्राश्च सर्वशः ।**
**अर्धमासा मासा ऋतवः संवत्सरश्च कल्पताम् ॥**
(ना० उ०)

अत्र सा० भाष्यम् - ''पक्ष्मपातपरिमिताः सूक्ष्मकालविशेषाः निमेषाः, निमेषेभ्योऽप्यधिकाः कालविशेषाः काष्ठाः । ताभ्योऽप्यधिकाः कालाः, ततोऽप्यधिका मुहूर्त्ताः - अहोरात्राः ......अर्धमासाः



शुक्लकृष्णपक्षरूपाः, मासाश्चैत्रवैशाखाद्याः, ऋतवो वसन्तग्रीष्माद्याः, संवत्सरश्च प्रभवविभवादिरूप इति ।''

''नदीव प्रभवात्काचिदित्यारभ्य .......... वर्षाभ्य इत्यर्थः'' इति तृतीयानुवाकान्तं कालस्यैव वर्णनं दृश्यते-आरण्यकोपनिषदि । ''अणुशश्च महशश्च क्षणमुहूर्त्तादिरूपाः क्षुद्रकालाश्च दिवसपक्षादिरूपा महाकालाश्च संवत्सरं श्रिताः'' इति सा० भा० । ''ऋतुर्ऋतुनानुद्यमानः'' इति मन्त्रस्य सा० भाष्ये - ''वसन्तर्तावनन्तरमेव ग्रीष्मर्तुः प्रवर्तते न त्वीषदपि व्यवधानमस्ति.........मुहूर्त्तानां त्रिंशत् संख्या यस्मिन्नहोरात्रे विद्यते सोऽयं त्रिंशकः, षष्ठिसंख्याकाहोरात्रात्मक ऋतुरित्यर्थः'' इत्यादि । ''द्वादश मासाः संवत्सरः मधुश्च माधवश्च वासन्तिका ऋतू'' इत्यादि यजुःसंहितायां तु शतशः पक्षमासर्तुसंवत्सरादिकालविशेषबोधकाः शब्दाः श्रूयन्ते । ''अहोरात्रे मे कल्पेताम्, ऋतवो मे कल्पयन्ताम्'', संवत्सरोसि परिवत्सरोसि इडावत्सरोसीत्यादि संवत्सरप्रभेदः, वसन्तः शिरः, ग्रीष्मो दक्षिणः इत्यादि ऋतुवर्णनम्, एवम् अरुणोरुणरजाः पुण्डरीक इत्यादि द्वादशमासनामवर्णनम्, अधिकमासस्यापि विचारः यजुर्ब्राह्मणे ग्रन्थे सुस्पष्टं भवति।

एवम् ऋग्वेदस्य 164 सूक्ते ''सप्त युञ्जन्ति रथमेकचक्र''-मित्यादि- ऋग्द्वारा कालचक्रवर्णनम् । तत्र सा० भा० - भूतभविष्यद्वर्तमानाख्यास्त्रयः कालाः त्रिनाभयः तद्विशिष्टं चक्रं चक्रवत् पुनः पुनः परिभ्रममाणं संवत्सराख्यं चक्रमजरं मरणरहितं न हि कदाचिदपि कालो म्रियते । ''अनादिनिधनः काल'' इति स्मृतेः । ''विश्वा भुवनाधि तस्थुः'' इत्यत्र कालाधीनत्वात्सर्वस्य स्थितेः इति ।

श्रीरामो वदति -
**न खिद्यते नाद्रियते नायाति न च गच्छति ।**
**नास्तमेति न चोदेति महाकल्पशतैरपि ।** (योगवासिष्ठम्)

''वेदमासो धृतव्रतो द्वादशप्रजावतः'' इत्यादि ऋचां भाष्ये सुविशदं कालवर्णनं द्रष्टुं शक्यते । शतपथब्राह्मणे ऋतुब्राह्मणम् (1अ. 2का. 3ब्रा.) (3अ. 1ब्रा.) इत्यादि ब्राह्मणभागेषु कालचर्चा वर्तते ।

ऋतुविषयकसामोपासना, ऋतुषु पञ्चविधं सामोपासीत वसन्तो हिंकारो ग्रीष्मः प्रस्ताव इत्यादि । एवं छान्दोग्योपनिषदि ब्रह्मवेत्ता गतिः ''अथ......अहरहः पक्षः ....... षड् मासाः ........ संवत्सर'' इत्यादि सामवेदे। अथर्ववेदे च 19 का० 53,54 सूक्तद्वयमपि कालविशेषावबोधकम्। ''कालो अश्वो वहति ..... परमो नु देवः'' इत्यन्तम् । आयुर्वेदधनुर्वेदादीनपि कालः न त्यजति । ''कालाः शीतोष्णवर्षलक्षणः'' शीतोष्णवर्षलक्षणाः पुनर्हेमन्तग्रीष्मवर्षाः संवत्सरः कालः इति ।

कालः पुनः परिणमते । परिणामी ऋत्वयनादिरूपः कालः (चरकसं०) । सुश्रुतायामपि – ''कालकृताः प्रवातनिवाता तपच्छायाज्योत्स्नातमःशीतोष्णवर्षाहोरात्रपक्षमास ........... संवत्सरविशेषाः'' स्नेहन स्वेदनवमन-विरेचनादीनां कर्मणां कालविशेषनिर्देशोऽस्ति ।

**''शरद्धेमन्त शिशिरकालो युद्धेषु चोत्तमः ।**
**वसन्तो मध्यमो ज्ञेयोऽधमो ग्रीष्मः स्मृतः सदा''**
इति युद्धायापि कालः प्रदिष्टः ।

श्रौतकर्माणि यज्ञयागादीनि वेदोक्तोचितकालविधेयानि सन्ति । वेदास्तावत् यज्ञकर्मप्रवृत्ताः, यज्ञाः प्रोक्तास्ते तु कालाश्रयेण ............ 'यस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद ..........'' इति ऋग्वेद सा० भा० भूमिकायां ''संवत्सरमेतद् व्रतं चरेत्'' इत्यादि संवत्सरविधयः वसन्ते ब्राह्मणोऽग्निमादधीत'' इत्यादि-ऋतुविधयः, मासपक्षतिथिविधयः, प्रातःकालादिविधयश्च सर्वे कालमुद्दिश्योक्ताः ।

परन्तु एते कालविशेषाः परमपुरुषात् स्वप्रकाशस्वरूपात् परमेश्वराज्जाता इति ''जज्ञिरे पुरुषादधि'' इत्युपनिषद्वचनं बोधयति । अथर्ववेदे तु कालस्य देवतात्वं प्रतिपादितं 'कालो देवता' इति । 'कालः कलयतामहम्' इति गीतांशभाष्ये शङ्करः कालः .......... कलनं गणनं कुर्वताम्-अहम् ''अहमेवाक्षयः कालः'' इत्यत्र भाष्ये अहमेव अक्षयः अक्षीणः कालः प्रसिद्धः क्षणाद्याख्यः अथवा परमेश्वरः कालस्यापि कालोऽस्मीति ।



कालस्य विषये योगवासिष्ठे रामः-
**''सर्वभक्षकोऽयम् । किन्तु अस्य भक्षकः कोऽपि नास्ति ।''**
**''तृणं पांसुं महेन्द्रं च सुमेरुं पर्णमर्णवम् ।**
**आत्मंभरितया सर्वमात्मसात् कर्तुमुद्यतः ॥''**
इत्याद्युक्त्वा अनन्तरं
**''निर्दयः कठिनः क्रूरः कर्कशः कृपणोऽधमः ।**
**न तदस्ति यदद्यापि न कालो निगिरत्ययम् ॥''**

इत्यादि । सूर्यगतिमनुरुद्ध्यैव दिनमाससंवत्सरादिव्यवहारो भवतीति पतञ्जलिमहर्षिर्महाभाष्ये ''येन मूर्तीनमित्यादि'' ।

सायणाचार्यः ''शास्त्रदृष्टिमन्तरेण न प्रदृश्यते'' इति सुष्ठु अवोचत्। अर्थात् न्यायमीमांसादिदर्शनप्रतिपाद्यपदार्थज्ञानादेवावगन्तुं शक्यते कालः क इति नान्यथा । सत्यमिदं न वयं जानीमः कः काल इति तथापि भूतभविष्यद्वर्तमानभेदेन कालव्यवहारं कुर्मः, चेतनाचेतनादि-समस्तपदार्थान् रङ्गमञ्चेऽत्र संसारे नर्तयति कालः । अयं परमेश्वराज्जातो वा परमेश्वरस्वरूपो वा भवतु-अकाट्यतथ्यमिदं ''तेन विना तृणमपि न चलति'' इति ।

अतः कालाय तस्मै नमः - तत्सत् । इति ।

❖

# अवधूतस्य कपोतो गुरुः

सुनील कुमार प्रधानः

कस्मिंश्चिदरण्ये एकः कपोतः स्वकीयया भार्यया सह नीडं निर्माय सुखेन वसति स्म । किंचित्कालानन्तरं कपोती अण्डानि सुषुवे । ईश्वरस्य कृपया तेभ्यः अण्डेभ्यः कपोतबालाः प्रादुरभवन् । शनैः शनैः ते कपोतबालाः प्रत्युद्गन्तुम् आरब्धवन्तः । स्वकीयानाम् आत्मजानां मुग्धचेष्टाभिः कपोतः कपोती च मोदमनुभूतवन्तौ । वस्तुतः एतौ कपोतः कपोती च भगवतः मायया विमोहितौ । तौ अहर्निशं पुत्रपालनपोषणरक्षणे तत्परौ । एकदा बालानां भोजनान्वेषणार्थं तौ अरण्याद् बहिः अपरम् अरण्यं गतवन्तौ । तान् अबोधान् कपोतबालान् दृष्ट्वा कश्चित् व्याधः त्वरितमेव जालमातत्य तान् जग्राह । तत्क्षणमेव कपोतदम्पती बालपोषणमादाय स्वनीडमाययतुः । परं तु हन्त ! आत्मजाः जाले संवृताः । तान् वीक्ष्य कपोती भृशं रुराव । अतिशयरागात् सा कपोती अपि आत्मानम् अहन् । कपोतश्च स्वकीयानाम् आत्मजानां प्रियायाश्च शोकेन धृतिमुत्ससर्ज –

**सोऽहं शून्ये गृहे दीनो मृतदारो मृतप्रजः ।**
**जिजीविषे किमर्थं वा विधुरो दुःखजीवितः ॥**

(श्रीमद्भागवतम् 11.7.70)

इत्थं विलपन् स कपोतः सर्वं जानन्नपि जाले चकूर्द प्राणान् तत्याज च।

एतत् कपोतदृश्यं पश्यति कश्चित् ब्रह्मज्ञानी अवधूतः दत्तात्रेयः। सः कपोतस्य शिष्यत्वम् अङ्गीकरोति, कपोतस्य आचरणेन इमां शिक्षां च प्राप्नोति– 'यः कुटुम्बी विषयेषु परिजनेषु वा निवसन् आनन्दम् अनुभवति तथा च कुटुम्बस्य भरणपोषणे एव दत्तचित्तः भवति स कदाचिदपि मोक्षं प्राप्तुं नार्हति । स तु कपोतः इव स्वजनैः सह नितराम् अवसीदति ।' कुरुक्षेत्रे योद्धुम् उद्यतः कश्चित् अर्जुनः अपि स्वजनविमोहितः । 'न काङ्क्षे विजयं कृष्ण' एवञ्च 'गाण्डीवं स्रंसते हस्ताद्' इत्युक्त्वा स 'आरूढच्युतः' । किन्तु कृष्णस्य धर्मानुप्राणितकर्मणा अभिप्रेरितः अर्जुनः स्वकर्मणि सन्नद्धोऽभूत् । अतः इदं सिद्धं यत् मानवशरीरं मुक्तेः विवृतद्वारम् । एतत् प्राप्य यः कपोत इव आचरति स नूनमेव 'आरूढच्युतः'। एतद् वैचारिकसाम्यम् आधुनिकपरिदृश्ये सुतरां प्रासङ्गिकम् अन्वेष्टव्यं चास्तीति शम् ।

❖



# भवभूतेः रामः–एको विमर्शः

रेखा रानी

भारतीयसंस्कृतौ रामः अवतारी पुरुषोऽस्तीत्यतः असौ मर्यादापुरुषोत्तमः । प्राज्ञाः रामस्य समग्रं चरितम् आदर्शसंवलितम् अस्तीति मन्वते । रामायणस्य मौलिकः आख्याता वाल्मीकिः रामकथादावेव प्रमाणीकरोति – **'नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी'** ति।।[1] वस्तुतः महर्षिः वाल्मीकिः रामचरितरूपेण एकस्य पूर्णचरितस्य अवधारणम् अस्माकं पुरतः उपस्थापयति इति वयं निर्विचिकित्सया कथयितुं शक्नुमः । अत एव महागीतिकारः जयदेवः 'केशव ! धृतरामशरीर'[2] इत्यनेन रामं मानवमानसमरालरूपेण संस्तौति । कालप्रवाहस्याधीनं रामचरितं बहुषु रूपेषु दृग्गोचरं भवति । कवीनां व्यक्तिगताः रुचयः प्रवृत्तयः वा एवञ्च सांस्कृतिकादर्शानुगुणं वातावरणम् एतस्य कारणमस्ति । वाल्मीकि–तुलसी–कालिदास–भासप्रभृतयः कवयः मौलिककल्पनाप्रतिभया क्रमशः नव्यं रामचरितं निरूपितवन्तः । अस्यां शृङ्खलायां भवभूतिरपि अन्यतमः । भवभूतेः रामस्य केचन गूढाः विचारोत्तेजकाश्च पक्षाः अत्रोल्लेख्याः सन्ति ।

रामायणस्योत्तरकाण्डं भवभूतेः उत्तररामचरितमिति नाटकस्योपजीव्यम् । इह रामस्य उत्तरचरितम् उल्लिखितं वर्तते । मूलतः नाट्यनायकः भरतमुनिना विनिर्दिष्टनाट्यनियमस्यानुरूपं स्यात् । किन्तु कवेः कवित्वशक्तौ सर्जनात्मकविद्रोहः स्पष्टतया लक्षितः भवति ।

यद्यपि रामस्य धीरोदात्तता भवभूतिना रक्षिता, तथापि सीतानिर्वासनस्य पश्चात् रामस्य दशा तथा न भवति यथापेक्षितास्ति । रामस्यालौकिकं चरितं निरूपयन् कविः वासन्तीमुखेन आह -

**लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति ?[3]**

लोकोत्तरो रामः एकमलौकिकं कार्यं करोति-सीतायाः निर्वासनम्। एतां घटनामेव केन्द्रीकृत्य भवभूतिः स्वकीयां काव्यरचनां विदधाति । सीतानिर्वासनम् उत्तररामचरितस्य केन्द्रबिन्दुर्विद्यते । सीतायाः परित्यागेन रामस्य द्विविधं चरितं स्फुटति-प्रणयी रामः राजा रामश्च ।

रामः सीतायाः पतिः प्रियतमश्च । स्नेहाधिक्यात् साकेतम् आगते पश्चात् जनकपुरं गते च जनके खिन्नां देवीं जानकीं प्रबोधयितुं रामः क्षिप्रं वासगृहं विशति ।[4] चित्रदर्शनदृश्यं प्रमाणीकरोति यत् पतिः रामः कियद्रागेण पत्न्याः सीतायाः मनो रञ्जयति । सीता न केवलं रामस्य अर्धाङ्गिनी अपितु रामस्य जीवनस्य सम्बलम् अस्ति । विरहविदग्धः रामः सीतया सह यापितानि दिनानि अश्रुनेत्रः स्मरति ।[5] पुनश्च, तृतीयाङ्के 'त्वं जीवितं त्वमसि मे हृदयं द्वितीयम्'[6] इति क्रन्दता रामेण सीतां प्रति गाढानुरागः स्पष्टतया ध्वन्यते । प्रथमतृतीयाङ्कयोः सीतां प्रति रामस्य सहजानुरक्तिः व्यञ्जिता अस्ति ।[7] प्रथमाङ्के रामस्य वैवाहिकजीवनस्य रुचिरं वर्णनं प्राप्यते । सीतायाः स्निग्धाङ्गस्पर्शेन विस्मितः रामः -

**'विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा**
**प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः ।[8]**

एवं प्रकारेण रामस्य दाम्पत्यजीवनस्य चित्रणे भवभूतिना रामस्य सूक्ष्मतमाः मानसिक्यः अवस्था अभिव्यञ्जिताः ।

राजरूपेण रामस्य चरितं निश्चयेन श्लाघ्यम् । नाटकस्यादौ एव प्रजानुरञ्जनाय रामः प्रतिज्ञाम् अकरोत्-



**स्नेहं दयां च सौख्यं च यदि वा जानकीमपि ।**
**आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा ।।[9]**

लोकानुरञ्जनाय राजा रामः जानकीमपि त्यक्तुम् उद्युक्तः । यः रामः इयं गेहे लक्ष्मीरित्येतया उक्त्या सीतां सर्वथा परितोषयति तां नन्दयति च, स एव रामः एकेन क्षुद्ररजकेनारोपे उत्थापिते सति सीता-निर्वासनस्य राजाज्ञां प्रददाति । रामस्य चरिते प्रणयिस्वरूपम् आदर्शस्य परिधौ नास्तीति प्रतीयते । यतो हि राज्ञः कर्तव्यनिर्वहणाय त्वरितं रामः स्वीकार्यां प्रियां भार्यामपि जहाति । अर्थात् प्रजार्थं राजा रामः किमपि त्यक्तुं शक्नोति इति निश्चप्रचम् । अत एव आधुनिकरामराज्यं परिकल्प्यते महाकविना भवानीदत्तशर्मणा -

**कदा विभो पुनर्देशे शासकाः स्युस्त्वया समाः ।**
**ये प्रजार्थं प्रियां भार्यां हातुं दर्शितविक्रमाः ।। [10]**

यः रामः सीतानिर्वासनस्य पश्चादपि तां नितरां स्मरति तमभिलक्ष्य वासन्त्याः वचनम्[11] इदमेव प्रमाणीकरोति यत् रामः एकः आदर्शः राजा, न तु पतिः । अत्र भवभूतिरपि रामस्य राजकीयस्वरूपात् अतीव भीतः प्रतिभाति । कारणमिदं यत् तृतीयाङ्के राज्ञः रामस्य क्रोधात् सीता आशङ्किता तथा च 'आर्यपुत्र' इति स्थाने 'राजन्' एवं सम्बोधनं सा प्रयोक्तुमभिकाङ्क्षति । अस्मिन् दुःसहे परिवेशे रामस्य राजस्वरूपमेव अस्माकं पुरतः आगच्छति । समासतः, भवभूतेः रामः समष्टिगतचरितस्य नेता वर्तते ।

सन्दर्भसूची


1. रामायणम्, 1/8
2. जयदेवः, गीतगोविन्दम्
3. उत्तररामचरितम्, 2/7
4. ,, 1/7, 'देव्यास्ततो विमनसः परिसान्त्वनाय'
5. ,, 1/27
6. ,, 3/26
7. ,, 1/35, 3/37..........
8. ,, 1/35
9. ,, 1/12
10. पं० भवानीदत्तशर्मा, भरतचरितम् 15/80 प्रकाशिका- संस्कृतप्रसारपरिषद्, आरा
11. उत्तररामचरितम्, 3/27


❖



# शब्दशक्तयः

कामिनी

शब्दानाम् अर्थबोधकः व्यापारः 'शब्दशक्तिः' इति कथ्यते । यथा घटस्य निर्माणे मृत्तिका, चक्रं, दण्डः कुम्भकारादयश्च कारणानि भवन्ति तथा च चक्रस्य घूर्णनं व्यापारो विद्यते तथैव अथबोधप्रसङ्गे शब्दः कारणम्, एवं च अभिधा लक्षणा व्यञ्जना चेति अर्थबोधकाः व्यापाराः भवन्ति । आचार्यैः एते शक्तिः अथवा वृत्तिः इति अभिधीयन्ते। मम्मटः एतदर्थं 'व्यापार' शब्दं प्रयुनक्ति । विश्वनाथश्च 'शक्ति'शब्दम्।

वाच्य-लक्ष्य-व्यङ्ग्य इति त्रिविधाः अर्थाः सन्ति । एतदनुसारम् अभिधा-लक्षणा-व्यञ्जना इति शब्दशक्तयः स्वीक्रियन्ते-

**वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः ।**
**व्यङ्ग्यो व्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः ॥**

(साहित्यदर्पणः)

(१) व्याकरणे 'अभिधा' एव शक्तिः कथ्यते । प्राचीनाः नैयायिकाः ईश्वरेच्छां शक्तिं मन्वते, परन्तु नव्यनैयायिकानां मतेन इच्छा एव शक्तिः । नैयायिकानां मतेन इच्छा द्विविधा-(1) एतत् पदम् एतम् अर्थं बोधयतु इति पदविशेष्यिका, (2) अस्मात् पदात् अयम् अर्थः बोद्धव्यः इति अर्थविशेष्यिका । नागेशभट्टः नैयायिकमतानि निरस्य पदार्थयोः मध्ये सम्बन्धमात्रं शक्तिः इति वदति । सम्बन्धः पदार्थद्वयनिष्ठो भवति तथा च तत्पदार्थद्वयात् भिन्नः भवत्येव ।

शक्तेः लक्षणं कथयतः नागेशस्य मतेन पदस्य अर्थस्य च वाचकवाच्यभाव एव शक्तिः-'तस्मात् पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः वाच्यवाचकभावापरपर्याया ।' (परमलघुमञ्जूषा)
भर्तृहरेरपि अनुरूपं मतं प्रतीयते-

**उपकारात् स यत्रास्ति धर्मस्तत्रानुगम्यते ।**
**शक्तीनामप्यसौ शक्तिर्गुणानामप्यसौ गुणः ॥**

(वाक्यपदीयम्)

एतस्यां शक्तौ पदपदार्थयोः तादात्म्यं मन्यते- ''योऽर्थः स शब्दः, यः शब्दः सोऽर्थः।'' इतरेतराध्यासस्य कारणेन शब्दार्थयोः तादात्म्यं स्वीक्रियते । एतेन तादात्म्येन एव 'शब्दः श्रुतः', 'इदानीम् अर्थः श्रूयते' इत्येतादृशः व्यवहारो भवति । अर्थः न तु कथनस्य अथवा श्रवणस्य विषयो भवति । परन्तु शब्दार्थयोः तादात्म्येन एतादृशः प्रयोगो दृश्यते । अथेदम् आक्षिप्यते यत् शब्दार्थयोः तादात्म्ये सति 'अग्नि'शब्दस्य उच्चारणमात्रेण मुखे अग्नेः अनुभवः भवेत् । परन्तु शब्दार्थयोः भेदः स्वाभाविकः, अभेदः केवलम् आरोपितः इत्ययमाक्षेपः निरस्यते। एतदपि उच्यते यत् एष तादात्म्यप्रसङ्गः बुद्धिस्थशब्दानां विषये प्रवर्तते न तु लौकिकशब्दानां विषये ।

एषा शब्दशक्तिः अपशब्देन शब्दान् अनुमापयितुं प्रवर्तते इति नैयायिकाः । परन्तु नागेशस्य मतेन शक्तिः शब्देष्विव अपशब्देष्वपि भवति, अपशब्देनाऽपि अर्थबोधो भवतीति अत्र प्रमाणम् । नैयायिकमतं पोषयन् इव भर्तृहरिः आह यत् 'अस्य अपशब्दस्य अयं शब्दः' इति प्रतीतिद्वारा शब्दः अर्थम् अवबोधयति ।

(२) शब्दस्य अर्थः अभिधाशक्त्या एव अभिधीयते इति नास्ति, अपि तु यदा मुख्यार्थे बाधा भवति तदा रूढिं प्रयोजनं वा आश्रित्य अपरः अर्थः अवगम्यते । स चाऽर्थः 'लक्ष्यः', तस्याऽर्थस्य बोधयित्री शक्तिः 'लक्षणा' अस्ति । विश्वनाथस्य मतेन-



**मुख्यार्थबाधे तद्युक्तो ययाऽन्योऽर्थः प्रतीयते ।**
**रूढेः प्रयोजनाद् वाऽसौ लक्षणा शक्तिरर्पिता ॥**

(साहित्यदर्पणः)

'गङ्गायां घोषः' इति प्रयोजनवत्याः लक्षणायाः उदाहरणं प्रसिद्धम्। अत्र लक्षणायाः स्वरूपविषये 'स्वशक्यसम्बन्धो लक्षणा' इति नैयायिका वदन्ति । स्वबोध्यसम्बन्धो लक्षणेति मीमांसकाः । नैयायिकैः पदे लक्षणा स्वीक्रियते । मीमांसकैस्तु वाक्ये । नागेशः उभयविधं मतमिदम् उद्धरति। परन्तु तेन लक्षणा न स्वीक्रियते । तस्य मतेन तात्पर्ये सति सर्वे शब्दाः सर्वान् अपि अर्थान् वाचयितुं शक्याः – 'सति तात्पर्ये सर्वे सर्वार्थवाचकाः' इति भाष्यमेव गृहाण । वैयाकरणानां मतेन यदि लक्षणा शाब्दबोधस्य कारणं भवेत् तर्हि शाब्दबोधरूपं कार्यं प्रति शक्तिजन्या उपस्थितिश्चेति कारणद्वयं स्वीकर्तव्यं भवेत्, तेन च कार्यकारणभावद्वयस्य स्वीकरणे गौरवापत्तिः स्यात् ।

परन्तु शक्त्या एव लक्षणा सिध्यति । शक्तिः द्विधा- प्रसिद्धा अप्रसिद्धा चेति । सामान्यैः जनैः ज्ञातव्या शक्तिः प्रसिद्धा, सहृदयैः ज्ञातव्या अप्रसिद्धा भवति । यत्र अपरैः शास्त्रकारैः लक्षणा स्वीक्रियते तत्र वैयाकरणाः अप्रसिद्धया शक्त्या कार्यं निर्वहन्तः दृश्यन्ते । तेन कथितकार्यकारणभावाधिक्यगौरवं न आपद्येत ।

(३) येषामर्थानां प्रतीतिः अभिधया लक्षणया वा न भवति तेषां प्रतीतये एका अपरा शक्तिः स्वीकरणीया भवति । सा व्यञ्जना इति कथ्यते, तद्यथाह विश्वनाथः-

**विरतास्वभिधाद्यासु ययार्थो बोध्यते परः ।**
**सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च ॥**

(साहित्यदर्पणः)

अभिधा लक्षणा चेति शक्तिद्वयं शब्दस्यैव । व्यञ्जनायाः सम्बन्धः शब्देन अर्थेन च सह भवति ।

नैयायिकाः लक्षणायामेव व्यञ्जनायाः अन्तर्भावं मन्यन्ते । वैयाकरणानां कृते व्यञ्जना अभीष्टा अस्ति । तद्यथाऽऽह नागेशः-

**''मुख्यार्थबाधनिरपेक्षबोधजनको मुख्यार्थसम्बद्धासम्बद्धसाधारणः प्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धः संस्कारविशेषो व्यञ्जना ।''**

(परमलघुमञ्जूषा)

एवमेव शब्दस्य त्रिविधाः शक्तयः प्रसिद्धाः । प्रत्येकं शास्त्रं स्वनियमानामनुरूपम् एकां शक्तिं शक्तिद्वयं शक्तित्रयं वा स्वीकुर्वत् अस्ति ।

❖



# 'स्वप्नवासवदत्ते' मिथ्याचारस्य कौशलम्

प्रकाश चन्द्र यादवः

**कर्मेन्द्रियाणि सयंम्य य आस्ते मनसा स्मरन् ।**
**इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते ॥**

इति गीता(3/6)वचने मिथ्या आचरन् जनः विमूढात्मा अज्ञः निन्द्यो वा भवतीति कथितम् अस्ति । एतद्विपरीतं विशिष्टस्य विज्ञस्य वा चरित्रं तत्रैवमुक्तमस्ति -

**यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ।**
**कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥**

(गीता 3/7)

अर्थात् चित्तवृत्तेः निरोधं कुर्वन् यः इन्द्रियाणि तत्तदर्थेभ्यः नियमयति, केवलं च वाक्पाण्यादिभिः कर्मेन्द्रियैः कर्मयोगम् आचरति, तादृशः असक्तः जनः विशिष्टः भवति । परन्तु यः यथाकथञ्चित् वाक्पाण्यादीनां कर्मेन्द्रियाणां वृत्तिमेव नियमयति, किन्तु चित्तवृत्तेः अनियमनात् इन्द्रियभोग्यान् विषयान् सर्वदा स्मरति सः मिथ्याचारः एवाऽस्ति । अर्थात् मिथ्याचारत्वे सदाचारत्वे वा चित्तस्य वृत्तिरेव प्रमाणम्, न तु वागादिकर्मेन्द्रियाणाम् । अस्मिन् विषये अन्तरङ्गवृत्तिरेव सदसद्विवेकाधारः, न तु बहिरङ्गकार्यमिति अत्र भावः ।

परन्तु अवस्थानुकृतौ नाट्ये बहिरङ्गवृत्तिः दृश्या भवति, पात्राणाम् अन्तःकरणे निहितो भावः पारोक्ष्येण कदाचित् केनचित् वा प्रकटितो

भवति । अतः तत्र 'वस्तु-नेतृ-रस' इति त्रिविधस्य नाट्यतत्त्वस्य पुष्टये सर्वविधेषु अभिनयेषु सत्यस्य निगूहनं तथा च वागादीनां कर्मेन्द्रियाणाम् अनिरुद्धः कापटिकः प्रयोगः बहुधा दृश्यते । तेन च नाट्यानन्दः अनुभूयते एव । तेषु तेषु स्थलेषु सत्यकथनेन न केवलम् आनन्दव्यत्ययः अपि तु नाट्यगतिरोधः अपि सम्भाव्यते । मिथ्याचारं यथाऽऽह भवभूतिः-

**बहिः सर्वाकारप्रगुणरमणीयं व्यवहरन्**
**पराव्यूहस्थानान्यपि तनुतराणि स्थगयति ।**
**जनं विद्वानेकः सकलमतिसन्धाय कपटै-**
**स्तटस्थः स्वानर्थान् घटयति च मौनं च भजते ॥**

मिथ्याचारस्तु लौकिकव्यवहारेषु सातिशयं महत्त्वं भजते । अत एव साहित्ये तस्य प्रतिष्ठा स्वाभाविकी वर्तते । न केवलं कार्यार्थमपितु विशुद्धमनोरञ्जनार्थमपि वैदिककालत एव मिथ्याचारः कविभिः सस्पृहं पुरस्क्रियमाणो लक्ष्यते । नाट्यसाहित्ये विचित्रतरं संविधानं प्रेक्षकेभ्यस्तत्स्थं मनोरञ्जनं च प्रस्तुवन् मिथ्याचारो नित्यं नवं नवं रूपं विदधाति ।

न खलु मिथ्याचारोऽधमानां वा दुर्वृत्तानामेवासाधुकार्येषु प्रयुज्यतेऽपितु सद्वृत्तानामपि देवानां राज्ञामृषीणां च साधिष्ठ-प्रयोजनेष्वपि भूयिष्ठं विलसतीति दर्शनीयमत्र । मिथ्याचारं विना तु नाट्यं न सम्यक् प्रवर्तत इति विचित्रं किन्तु सत्यमेव । नानारूपधरा मिथ्याचाराः संवरण-मृषाभाषणार्धसत्यभाषणान्यथाकरण-भावनिगूहन-परिहासवचन-श्लिष्टपदावलीच्छायात्मककृतक-प्रयोगेन्द्रजालादिभिर्नाट्यशरीरम् आद्यन्तं व्याप्नोति । नाट्यशास्त्र आरभटीवृत्तिर्बहुकपटवञ्चनोपेता दम्भानृतवचनवती रौद्रभयानकयो रसयोः समाविष्टा मिथ्याचारं सङ्केतयति । वस्तुतो मिथ्याचारः सर्वासु वृत्तिषु अन्यतममथ च विशिष्टं स्थानं भजते ।

मिथ्याचारेण प्रायो वञ्चना विधीयते, किन्तु क्वचन मिथ्याचारोऽभ्युदयावहो भवति । अनेन बहुविधानि प्रयोजनानि साध्यन्ते संविधानक्षेत्रे ।



भासो नाटके मिथ्याचारस्य प्रथमः प्रवर्तकः । अनिच्छन्नपि कश्चिज्जनो मिथ्याचारो भवत्येवेति निदर्शने भासः पटिष्ठः ।

स्वप्नवासवदत्ते मन्त्रिणां कापटिकयोजनया मिथ्याचारः प्रारभ्यते। लावाणकदाहे वासवदत्ता दग्धा, योगन्धरायणो दग्धश्च । यौगन्धरायणस्तदनु तपस्वी ब्राह्मण इति निगूढः, वासवदत्ता च तस्य भगिनी आवन्तिकेति प्रच्छन्ना बभूव ।[1]

(क) नाटकेऽस्मिन् वासवदत्ता प्रच्छन्नाऽस्ति, अतः अत्र बहुशः मिथ्याचारस्य प्रयोगो दृश्यते । यद्यपि वासवदत्ता सामान्या 'आवन्तिका' नास्ति, सा लावाणकदाहे दग्धाऽपि नास्ति, तथा च सा प्रोषितभर्तृकाऽपि नास्ति, तथापि प्रथमाङ्के सा तथैव उपन्यस्यते-

**योगन्धरायणः-** **प्रोषितभर्तृकामिमामिच्छामि अत्रभवत्या किञ्चित्कालं परिपाल्यमानाम् ।**

(ख) द्वितीयाङ्के आवन्तिकाख्यया वासवदत्तया उदयनस्य दर्शनीयत्वमुच्यते । परन्तु तया आत्मपरिचयप्रकाशनभयात् अन्यथावचनं क्रियते -

**चेटी - भर्तृदारिके ! यदि स राजा विरूपो भवेत् ?**
**वासवदत्ता- नहि नहि, दर्शनीय एव ।**
**पद्मावती - आर्ये ! कथं त्वं जानासि ?**
**वासवदत्ता- हला ! एवमुज्जयिनीयो जनो मन्त्रयते ।**

(ग) तृतीयाङ्के चेटी उदयनस्य कामदेवतुल्यं रूपं प्रशंसति। तत् निशम्य वासवदत्ता नितरां प्रसीदति । परन्तु प्रसङ्गान्तरेण सत्यं निगूहति तथा च मिथ्यावचनं करोति-

**चेटी - शक्यं भणितुं शरचापहीनः कामदेवः ।**
**वासवदत्ता- भवत्वेतावत् ।**
**पद्मावती - किंनिमित्तं वारयसि ?**
**वासवदत्ता- अयुक्तं परपुरुषसंकीर्तनं श्रोतुम् ।**

अत्र उदयनः परपुरुषः इति वासवदत्तायाः अभिप्रेतवचनेन मिथ्याचारः स्पष्टं ज्ञायते । परन्तु एतेन वासवदत्तायाः आत्मपरिचयः गुप्यते तथा च तस्याः चारित्रिकेण वैशिष्ट्येन अनन्तरं तस्याः अयम् अज्ञातवासः सफलतया निःशङ्कं प्रमाणीक्रियते ।

(घ) तृतीयाङ्के एव सपत्न्याः पद्मावत्याः कृते कौतुकमालिका-गुम्फनकाले वासवदत्ता 'अविधवाकरणं' नाम औषधं तत्र योजयितुं स्वसम्मतिं दर्शयति, यतो हि पद्मावत्याः अवैधव्येन तस्याः स्वस्याः अवैधव्यमपि सुरक्षितमासीत् । परन्तु तस्यां मालिकायां सपत्नीमर्दनं नाम औषधं योजयितुं निषिध्यति, यतो हि तेन औषधेन पद्मावत्याः सपत्न्याः अर्थात् तस्याः वासवदत्ताया एव मर्दनं लक्षितमासीत् । परन्तु सपत्नीर्मदनेति औषधस्य योजनप्रसङ्गे सा आत्मपरिचयं गोपायित्वा मिथ्या आचरति –

**वासवदत्ता- इदं तावदौषधं किं नाम ?**
**चेटी - सप्तनीमर्दनम् ।**
**वासवदत्ता- इदं न गुम्फितव्यम् ।**
**चेटी - कस्मात् ?**
**वासवदत्ता- उपरता तस्य भार्या ।**

(ङ) एवमेव चतुर्थाङ्के वासवदत्तां प्रति उदयनस्य स्नेहप्रसङ्गे वासवदत्ता अन्यथाकरणेन पद्मावतीं सम्बोधयति –

**पद्मावती - एकः खलु मे सन्देहः ।**
**वासवदत्ता- किं किम् ?**
**पद्मावती - यथा मामार्यपुत्रस्तथैवार्याया वासवदत्ताया इति ।**
**वासवदत्ता- अतोऽप्यधिकम् ।**
**पद्मावती - कथं । त्वं जानासि ?**
**वासवदत्ता- यद्यल्पः स्नेहः, सा स्वजनं न परित्यजति ।**

(च) तस्मिन्नेवाङ्के वासवदत्तास्मरणेन जातमश्रुपातं गोपायितुम् उदयनः पद्मावतीम् अनृतं वदति –



**राजा - पद्मावति !**
**शरच्छशाङ्कगौरेण वाताविद्धेन भामिनि ।**
**काशपुष्पलवेनेदं साश्रुपातं मुखं मम ॥** (4/8)

पञ्चमाङ्के **'चिरात् खलूपरता वासवदत्ता'** इति विदूषकवचनं तस्य वस्तुस्थितिविषयकम् अज्ञानं द्योतयति । षष्ठेऽङ्के **'न खलु न खलु प्रवेष्टव्यम् । मम भगिनी खल्वेषा'** इति उदयनस्य पुरतः योगन्धरायणस्य परिहासवचनं मूलतः मिथ्याचारोऽपि नाट्यरसं पोषयदस्त्येव ।

**निष्कर्षः– 'नाट्यं भिन्नरुचेर्जनस्य बहुधाऽप्येकं समाराधितम्'** इति महाकविः कालिदासः ।[2] अतः नाट्यं भिन्नरुचिभिः जनैः रस्यम् उपभोग्यं वाऽस्ति । एतत् दार्शनिकैः सत्यानुसन्धिभिः भोग्यं नाऽस्ति । अतः सामान्यजीवने यथा मिथ्याचारः कौशलेन क्रियते, तथा नाट्येऽपि आचर्यते । एतेन नाटयं लौकिकव्यवहारस्य बलिष्ठः प्रतिनिधिः इति सिध्यति, तथा च मनःप्रीतये मिथ्याचारः अपि उपयोगी अस्तीति साधीयते ।

## सन्दर्भसूची

1. Millet : The Art of the Drama, P. 9. 'A large element of the charm of romantic comedy lies in its improbability and unreality — indisguised heroes and heroines. Shakespeare saw this so clearly.'

2. मालविकाग्निमित्रम्, प्रथमोऽङ्कः ।

❖

# उर्वी

समीक्षक:- सुनील कुमार प्रधान:

पुस्तकस्य नाम - उर्वी, कवि:- डॉ० रवीन्द्रकुमारपण्डा, प्रकाशक:- परममित्र प्रकाशन, डी पॉकेट-214, दिलशद गार्डेन, दिल्ली-110095, प्रकाशनवर्षम्-1999, पृष्ठानि-170, मूल्यम्-175/- रूप्यकाणि ।

संस्कृतकवितासङ्ग्रहेऽस्मिन् 130 कवितासु कवि: स्वकीयं वैविध्यपूर्णविचारम् उपस्थापयति । क्वचित् 'अपगता रात्री'ति कवितायां परोक्षं प्रियां प्रति प्रणयनिवेदनं तु क्वापि 'कालस्य कुटिला गति'रिति कवितायाम् आधुनिकं भौतिकपरिवेशं निरूप्य कवि: धर्मस्य न्यायस्य च कथाया: व्यर्थत्वं प्रतिपादयति । न केवलम् तदेव अपि तु वातायनम्, नियति:, साङ्ख्यपुरुपादिषु कवितासु दार्शनिकं तथ्यमपि सम्यक् प्रस्तौति कवि: ।

उत्तरमिति कवितायां कवे: अनुपमा कल्पनाशीलता अतीव रम्या-

**तव पत्रे लिखितमस्ति**
**त्वं कथमसि ?**
**उत्तरं मे**
**अहमस्मि**
**यथा जलशून्यकलशी ।**

इह हि दीर्घा: लघ्व्यश्च कविता: समानरूपेण चेतोरञ्जिका: । कवितासु यत् मानवीकरणं कविना कृतं तत्तु हिन्द्या: छायावादिकवितानुगुणं वर्तते । यथा -

**अहमेक: क्षुद्रपादप: ।**
**हृदयेऽनन्तसन्ताप: ।**
**लघ्वी ममाशा**
**विविधयितुं च ममाभिलाषा**
**मयि सर्वेषां कोप: ।..........।** (पादप:)

'भारतजननी' इति अस्यां कवितायां कवे: राष्ट्रियभावना मुखरितास्ति । कवितासु प्रवाह: सततं रसोद्रेकश्चापि नैसर्गिक: । तथ्योपस्थापनस्य कलायां प्रवीणोऽयं कवि: सर्वथा भावगाम्भीर्यं रक्षति ।

पुस्तकस्य कलेवरं यद्यपि नितरां चित्ताकर्षकं तथापि मौलिका: अनित्य-दोषा: मुद्रणदोषाश्च काव्यत्वम् अपकुर्वन्ति । आगामिसंस्करणे एते दोषा: दूरीभवन्तीति मे विश्वास: । आधुनिकसंस्कृतकाव्यरचनाश्रेण्याम् अयं कवितासङ्ग्रह: एकमनुपमं मानदण्डं संस्थापयति इति मे प्रबलाशा। अपि च आशासे कवि: प्रकृतकाव्यरचनाभि: तन्नाम कवितासङ्ग्रहै: गीर्वाणवाणीं भूपयिष्यतीति शम् ।



# "काव्येषु नाटकं रम्यम्" - एकं पुनरीक्षणम्

डा० विजय कुमार झा

शब्दार्थशरीरकस्य काव्यस्य मूले आनन्दस्यातिरक: विद्यते । आनन्द: द्विविध: - ब्रह्मानन्द: काव्यानन्दश्च । ब्रह्मानन्दे काव्यानन्दे च एतावानेव भेद: विद्यते यत् प्रथम: संसारनिरपेक्ष: आत्मगतमात्र: भवति, परन्तु चरम: संसारस्थ: सन्नपि लौकिकधरातलादूर्ध्वं तिष्ठति । यद्यपि तत्र व्यक्तित्वम्, तथापि तत्क्षुद्रस्वार्थेभ्य: उपरि वर्तते । परन्तु काव्यानन्द: संसारसापेक्ष: भवति । तत्र कविहृदयं जनसाधारणहृदयेन सह साधारणीकृतं भवति । तस्य दृष्टि: मानवीया भवति । तस्मात् काव्ये प्रकृतिसदृशस्य निश्चेतनतत्त्वस्यापि मानवीकरणं विधाय तस्य भावसमन्वय: क्रियते। तस्मात् काव्ये वैयक्तिकता आनन्दस्य मात्रा चाधिके भवत: । एवं काव्यं नाम समाजोद्यानपुष्पमिति नापलापार्हमस्ति । यथा पुष्पोद्याने गुञ्जन्तो भ्रमरा: पुष्पपरागं पायं पायं मत्ता भवन्ति, स्वीयस्य जीवनस्य सार्थकतां चानुभवन्ति, तथैव सामाजिकेन केनचित् कृतं समाजस्यैव कृते तद्धृदय-हार इव समर्पितम्, रमणीयार्थप्रतिपादकं[1] समुचितललितसन्निवेशचारु काव्यं स्वकीयै: तैस्तै: गुणै: समाजोद्याने बम्भ्रम्यमाणानां भौतिकवादसन्तप्तानां जनानां हृदये रसपरिषेकं समुपस्थापयत् साहित्यापरपर्यायतया साहित्यस्य च सकलशास्त्राणां समवायरूपत्वात् विविधज्ञानपरिवर्धनाच्च परिमार्जनेन मानवजीवनस्य सार्थकतां प्रतिपादयति।

तदिदं काव्यं दृश्यं श्रव्यञ्चेति भेदेन द्विविधं भवति ।[2] चक्षुरिन्द्रियग्राह्यं काव्यं दृश्यम्, श्रोत्रेन्द्रियग्राह्यं श्रव्यमित्युच्यते । श्रव्यं काव्यं गद्य-पद्य-चम्पूभेदै: त्रिविधं[3] भवति । दृश्यकाव्यम् अभिनेयं भवति। तत्र च नटादौ रामादिस्वरूपारोपो भवति । अतो दृश्यकाव्यं 'रूपकम्'

इत्युच्यते । रूपकस्यापि नाटकप्रकरणादि-दश भेदाः सन्ति । उपरूपकाण्यपि नाटिकादिभेदेन अष्टादश भवन्ति । एवं भेदोपभेदैः काव्यस्य बहुविधत्वं भवति । अतः 'काव्येषु नाटकं रम्यम्' इत्यत्र 'काव्येषु' बहुवचनं प्रयुक्तम् ।

**'काव्येषु नाटकं रम्यम्'** इत्यत्र किं नाम काव्यम्, कानि नाटकानि, किं वा रम्यम् इति प्रश्नः विद्यते । विश्वनाथमतेन **'रसात्मकं वाक्यं काव्य'**मुच्यते[4] । मम्मटस्तु **'तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि'**[5] इति कथयति । नाटकविषये धनञ्जयः कथयति- **'अवस्थानुकृतिर्नाट्यम्'**[6], **'वस्तु नेता रसस्तेषां भेदकः'**[7] । अत्र नाटके रसस्य महत्त्वम् उररीक्रियते । रसनिष्पत्तौ आनन्दोपलब्ध्यै च नाटकानां रचना । 'रम्यम्' इत्यनेन शब्देन मनोहरत्वं मनोज्ञत्वं हृद्यत्वं सुन्दरं चाभीष्यते । किं नाम रम्यत्वम्? इति जिज्ञासायां माघेन निरूप्यते- **'क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः।'**[8] कालिदासेनाऽपि अभिज्ञानशाकुन्तले-'सरसिजमनुविद्धं शैवलेनापि रम्यम्' इत्युक्त्वा ''रम्यम्''= मनोहरम् एव प्रतिपादितम् । रम्यता द्विविधा भवति-स्वाभाविकरम्यता यत्नसाध्यरम्यता च । यत्र भावानामभिव्यक्तिः स्वाभाविकरूपेण भवति तत्र स्वाभाविकरम्यता, यत्र तु भावानामभिव्यक्तिः कविसाध्या तत्र यत्नसाध्यरम्यता भवति । काव्येषु रम्यता वस्तुनिष्ठा भवति, या स्थायिनी भवति ।

उपर्युक्तदृश्यश्रव्यभेदयोः काव्ययोः दृश्यं काव्यमधिकं रमणीयमिति आलोचकाः वदन्ति- ''काव्येषु नाटकं रम्यम्'' इति । अत्र नाटकपदेन दृश्यं काव्यमभीष्टमस्ति । यद्यपि नाटकं दृश्यकाव्यस्यान्यतमभेदोऽस्ति, तथापि सकलेषु रूपकभेदेषु नाटकं प्रधानम्। अत एव 'सर्वे पदा हस्तिपदे निमग्नाः' इति लोकोक्तिदिशा सकलमपि दृश्यं काव्यमभीष्टं तथापि सामान्येन- 'काव्येषु नाटकं रम्यम्' इत्यत्र नाटकमेवोक्तम् । अस्येदं कारणं श्रव्यकाव्ये ऐतिहासिकाः घटनाः केवलं श्रूयन्ते, दृश्ये (नाटके) धृतरामादिरूपैः नटैः मञ्चे उपस्थापितासु सकलासु घटनासु हृद्याः घटनाः सहृदयमनसि पूर्णरूपेण सङ्घटन्ते तथा चैवं सुस्पष्टतां गतासु घटनासु सहृदयमनसि रसपरिपाकोऽपि समुचितरूपेण समधिकं च जायते । तात्पर्यमस्ति यत् दृश्यकाव्ये काव्यमास्वादयितुं



माध्यमद्वयं लभ्यते, फलतः दर्शकानां कल्पनायाः श्रमः न्यूनः भवति, तथा च प्रभावः अधिकः उत्पद्यते ।

सम्प्रति प्रश्नोऽयमुत्पद्यते- दृश्यकाव्यस्य अनेकाः भेदाः भवन्ति, यथा-नाटक-प्रकरण-भाण-व्यायोगादयः, एतदतिरिक्तम् उपनाटकादि पुत्तलिकानृत्य-नुक्कड़नाटक-हास्य-व्यङ्ग्य-नाटिकादि। सर्वाणि रम्याणि भवन्ति केवलं नाटकं वा? द्वितीयः प्रश्नो विद्यते-प्राचीनकालस्य कवेः यथा-भास-कालिदास-भवभूति- अश्वघोषादेः नाटकं रम्यम् अथवा अर्वाचीन-कवीनाम् 'अनर्घराघव'रचयितुः मुरारेः, 'विद्धशालभञ्जिका'- 'कर्पूरमञ्जरी'- रचयितुः राजशेखरस्य, 'अमृतोदयः'रचयितुः गोकुलनाथादेः नाटकमपि रम्यम् ? तृतीयः प्रश्नो विद्यते-प्राचीनकाले ''काव्येषु नाटकं रम्यम्'' भवति अद्यापि वा ?

दृश्यकाव्यस्य सर्वे भेदाः रम्याः भवन्ति । यतो हि दृश्यकाव्येषु अभिनयादिप्रदर्शनाद्, वेशभूषाद्यलंकरणात्, प्राकृतिकदृश्यसंयोजनात्, आङ्गिकवाचिकाद्यभिनयसंमिश्रणात्, नृत्यगीतलास्यविलासात्, न केवलं सचेतसामेव रसास्वादो मनस्तोषश्च, अपि तु आबालवृद्धं शिक्षितानाम्, अशिक्षितानां नराणां नारीणां चानन्दावाप्तिः मनोरञ्जनं च भवति । प्राचीनानां कवीनां नाटकेषु स्वाभाविकरम्यता विद्यन्ते । किन्तु परवर्तिनां नाटककाराणां नाटकेषु यदा-कदा एव स्वाभाविक-रम्यता दृग्गोचरी-भवति । पुनश्च ''काव्येषु नाटकं रम्यम्'' इत्युक्तिः सर्वथा उचितैव । नाटके भावानामभिव्यक्तिः अवश्यमेव भवति । नाटकस्याधारः विद्यते । नाट्यशास्त्रस्याचार्यः भरतः ब्रह्मणः मुखेनाह यत्- इदं नाटकं पीडा-क्लेश-श्रमार्तानामानन्दस्य साधनं भविष्यति । एतत् नाटकं लोकत्रयस्य भावानामनुकरणं विद्यते- **''त्रैलोकस्य सर्वस्वं नाट्यं भावानुकीर्त्तनम्।''**[10]

यद्यपि गीतिकाव्येऽपि भावानां सघनता भवति, किन्तु ते भावाः वैयक्तिकाः भवन्ति । नाटकानां भावेषु व्यापिका मानवता समाहिता भवति ।

अधुनाऽपि वैज्ञानिकयुगे उक्तिरियं सर्वथा उचिताऽस्ति । प्राचीनकालादारभ्य अद्यावधि विविधासु भाषासु काव्यरचना सामान्यरूपेण रुचिकरी मनोहारिणी च विद्यते । किन्तु नाटकस्य महत्त्वं प्रतिदिनमाधिक्यमारोहति । इदानीं दूरदर्शनचलचित्रयोः प्रभावः

बालवृद्धनरनारीसमेतानां समस्तानां मानवानामुपरि विराजते । सर्वत्रैव एतयोः चर्चा प्रसरति, चलचित्रस्यैव गीतानां ध्वनिः सर्वत्र श्रूयते । अन्यानि प्राचीनानि सर्वाणि मनोरञ्जनसाधनानि चलचित्रस्य समक्षे विलुप्तानि। चलचित्रं नाटकस्यैव परिष्कृतं विकसितं च रूपं विद्यते । एतादृशं मनोरञ्जनं केनाप्यन्येन साधनेन भवितुं नार्हति । तत्र गत्वा नयनाभिरामं रमणीयं दृश्यं विलोक्य निशम्य च श्रोत्राभिरामं गीतमानन्दस्य यां परां कोटिं प्राप्नोति मानवः सा त्वन्यत्र दुर्लभा । एवमेव नाटके आनन्दतत्त्वस्य विश्रामदायितत्त्वस्यापि महत्त्वं विद्यते यथा भरतेन भणितम्-

**''दुःखार्त्तानां श्रमार्त्तानां शोकार्त्तानां तपस्विनाम् ।**
**विश्रान्तिजननं काले नाट्यमेतन्मया कृतम् ॥''**[11]

अतः आधुनिकपरिप्रेक्ष्ये चलचित्रमाध्यमेन अशिक्षितानां ग्रामीणानां स्त्रीणां पुरुषाणां च कृते नाटकस्य प्रयोगः अतीव उपयोगी विद्यते । श्रवणापेक्षया प्रत्यक्षदर्शनेन मानवानां हृत्पटलेऽधिकः प्रभावः भवति । अनेन प्रकारेण दर्शं दर्शं चलचित्रपटमल्पज्ञाः ग्रामीणाः अपि विशेषज्ञा भवितुं शक्नुवन्ति । अतः आधुनिकपरिप्रेक्ष्येऽपि साधूच्यते- **''काव्येषु नाटकं रम्यम्''** ।

**सन्दर्भसूची**


1. रसगङ्गाधरः
2. साहित्यदर्पणः, षष्ठपरिच्छेदः
3. ,, ,,
4. ,, प्रथमपरिच्छेदः
5. काव्यप्रकाशः, प्रथम उल्लासः
6. दशरूपकम्, प्रथमः प्रकाशः
7. ,, ,,
8. शिशुपालवधम्, 4/17
9. अभिज्ञानशाकुन्तलम्, 1/7
11. नाट्यशास्त्रम्, 1/115




*पुस्तकसमीक्षा*

# लक्ष्मीश्वरोपायनम्

समीक्षकः - सुनील कुमार प्रधानः

रचना - लक्ष्मीश्वरोपायनम्, रचयिता - श्री रघुवीर मिश्र 'द्विरेफः', प्रकाशकः - व्याकरणाचार्यश्रीव्रतनाथमिश्रः, ग्रामः+पत्रालयः- मसृढ़ी, भाया-जगदीशपुरम्, जिला-भोजपुरम् (विहारः), प्रकाशनवर्षम्- वै० सं०-2043 (ई० 1986), पृष्ठानि-द्विपञ्चाशत् ।

नवनवोन्मेषशालिन्या प्रतिभया विरचितम् इदम् उपायनं न केवलं यशोगाथा अपितु काव्यगुणसम्पन्नम् एकं ग्रन्थरत्नं विद्यते । एतत्काव्यस्य सम्यगवेक्षणात् निर्विचिकित्सया कथयितुं शक्नुमः यत् रचयिता द्विरेफापरनामधेयः श्रीरघुवीरमिश्रः प्रकृतकाव्यरचनासंवलितः अस्ति । प्रसाद-ओजोगुणसम्पन्नेऽस्मिन् काव्ये श्रीमन्महाराजलक्ष्मीश्वरसिंहशर्मदेवस्य अनुपममुदात्तजीवनचरितम् उपस्थापयति कविः । कलियुगे जनिमवाप्य अपि राजा स्वकीयया राज्यशासननिपुणतया कृतयुगं संस्थापितवान् इति एकत्र कविः निगदति -

**अमुष्य सच्छाशनगौरवेण**
**कलेर्न दुर्वर्णकुलेऽपि लेशः ॥६९॥**

अत्र कवेः कल्पना सुतरां श्लाघ्या वर्तते । राज्ञः लक्ष्मीश्वरस्य जीवनस्य बहुविधानां क्षेत्राणां ललितभाषया वैदर्भीरीत्या च यद्वर्णनं कविना निरूपितं तदास्वादनं कुर्मः तावत् (राज्ञः विद्यावैभवम्)-

**भाषामशेषामधिगन्तुकामो**
**गुरुण्डभाषामपि सोध्यगीष्ट ।**
**सद्विद्यया सापि च पावितास्य**
**न गङ्गया शुद्ध्यति कर्मनाशा ॥३३॥**

अत्र कवेः आशयः यत् गुरुण्ड(आङ्ग्ल)भाषामधीत्य राजा तामपि पवित्रामकरोत् । एषु स्थलेषु कवेः विषयोपस्थापनकौशलं विहितं वर्तते । राजधानी-विद्यावैभवादिवर्णनेषु पौवापर्यं नास्ति चेदपि कवेः वर्णनचातुरी सर्वत्र दृश्यते ।

काव्येऽस्मिन् वैविध्यपूर्णवृत्तयः दृश्यन्ते । क्वचित् रथोद्धता (श्लोक ४५), तुरङ्गगत्या चतुरङ्गबन्धः (श्लोक ८५), खड्गबन्धादयः (श्लोक ८९) अपि कवेः वैदग्ध्यं काव्यस्य चारुतां च प्रमाणीकुर्वन्ति। वस्तुतः नानावृत्तमयम् इदं काव्यम् आद्योपान्तं हृदयावर्जकम् । रसभङ्गः कुत्रापि न भासते । अलङ्कारेषु अर्थालङ्काराः कवये रोचन्ते । बहुषु स्थलेषु उपमा-उत्प्रेक्षा-निदर्शना-व्यतिरेकादयः एव प्रयुक्ताः सन्ति । शब्दालङ्कारः अनुप्रासः प्रायशः सर्वत्र स्फुटीभवति। मङ्गलाचरणस्य पश्चात् षट्सप्तश्लोकेषु काव्यस्य यत् अनिवार्यतत्त्वानां तथा च एतत्काव्यस्य उपादेयताविषयिणां तथ्यानाम् उल्लेखः कविना कृतः स तु काव्यरचनाक्षेत्रे मानदण्ड इव प्रतिभाति । यथाह कविः -

**ये भव्यकाव्यरचनाचणचातुरीका**
**उल्लासयन्ति समलङ्कृतमेव पद्यम् ।**
**तेषां मुदे कथमुदेतु मम प्रयासः**
**स्वस्वानुरूपविषये प्रवणो हि लोकः ॥४॥**

मूलभावरक्षणार्थं कविः नितरां सचेताः । भावानुरूपं भाषायाः सुमधुरया शैल्या द्वादशोत्तर-एकशतश्लोकेषु निबद्धम् इदम् उपायनं सर्वविधैः काव्यगुणैः सम्पन्नमिति निश्चप्रचम् ।

❖



## 'आरण्यक'स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते । वर्षारम्भः चैत्रात् (मार्च तः) मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते । मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते । तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्कः उपलब्धौ सत्यां प्रेषयिष्यते ।
3. वार्षिकं शुल्कं त्रिंशत् (३०) रूप्यकाणि, तथा च एकस्याङ्कस्य पञ्चदश रूप्यकाणि वर्तते । शुल्कं धनादेश/ड्राफ्टमुखेन प्रेषणीयम् ।
4. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिकनिबन्धाः प्रकाशनाय गृह्यन्ते ।
5. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते ।
6. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किताः वा स्युः । रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशश्च उल्लिखितौ स्याताम् ।
7. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम् ।
8. अस्वीकृता लेखा निर्धारित'स्टाम्प'-प्राप्त्यनन्तरं प्रत्यावर्तयितुं शक्याः ।
9. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते ।
10. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः ।
11. पत्रसम्बद्धः सर्वविधपत्रव्यवहारः धनादेशद्वारा शुल्कप्रेषणञ्च **डा० गोपबन्धु मिश्रः, सम्पादकः, आरण्यकम्, मारुतिमन्दिरम्, प्रकाशपुरी, आरा (विहारः)-802301 इति सङ्केतेन विधेयम् ।**

❖